Bill No. 3/07-08

55

2008-02-07

पञ्चाङ्ग पद्धति of शालग्राम

Ed. & Pub. by पं० श्रीधर ~~शिवाल~~

शिवलालजी at ज्ञानसागर प्रेस.

मुम्बई, 1967 Vikram era.

Loose leaves edn.,

9

12

1197

# पञ्चाङ्गपद्धतिप्रारम्भः

जिसको बम्बईमें।

पं० श्रीधर शिवलालजीने अपने

"ज्ञानसागर" छापखाना में.

पं० जनक प्रसाद वाजपेयी के प्रबंध से छपा.

प्रथमवार १००० मगसर बदी ११ संबत् १९६७ शके १८३२.

DATA ENTERED
Date 20/06/08

KALANIDHI
Rare Book Collection
IGNCA
ACC No.: R- 207
Date: 25.3.08

Indira Gandhi National Centre for the Arts

पं० श्रीगणेशायनमः॥ अथपञ्चाङ्गपद्धतिर्लिख्यते॥ धृतकुंकुमकेशरस्यवामंग प०
लतिलकःस्मार्तविधिनाद्विराचम्यप्राणानायम्यशांतिपाठंपठित्वात्रिमात्रं
॥ १ ॥ प्रणवमुच्चार्यलक्ष्मीनारायणादिदेवान्प्रणमेत्।अथशान्तिपाठमंत्राः ॐआ
नोभद्राः क्रंतवोयन्तुविश्वतोदब्धासोऽअपरीतासउद्भिदः॥ देवानोय
थासद्मिद्वृधेऽअसन्नप्रायुवोराक्षितारोदिवेदिवे ॥ १ ॥ देवानाम्भद्रासु
मतिर्ऋजूयतान्देवानाꣳरातिरभिनोनिवर्त्तताम्॥ देवानाꣳसख्यमुपसेदि
माव्वयन्देवानऽआयुः प्प्रति रन्तुजीवसे ॥ २ ॥ तान्पूर्व्वयानिविदाहू ॥ १ ॥
महेव्वयम्भगम्मित्रमदितिन्दक्षमस्रिधम्॥ अर्य्यमणंवरुणर्व सोम मा
श्वनासरस्वतीनः सुभगामय स्करत्॥ ३ ॥ तन्नोव्वातोमयोभुवातुभेषजं

तन्मातापृथिवीतत्पिताद्यौः॥तदग्रावाणःसोमसुतो मयोभुवस्तदाश्विनाश्रृ
णुतन्धिषण्यायुवम् ॥ ४ ॥ तमीशानञ्जगतस्तस्थुषस्पतिन्धियञ्जिन्वम
वसेहूमहेव्वयम् ॥ पूषानोयथाव्वेदसामसद्वृधेरक्षितापायुरदब्धः स्वस्त
ये ॥ २ ॥ स्वस्तिनऽइन्द्रोवृद्धश्रवाःस्वस्तिन पूषाव्विश्ववेदा स्वस्तिनस्ता
र्क्ष्योऽअरिष्टनेमिः स्वस्तिनोबृहस्पतिर्द्दधातु ॥ ६ ॥ पृषदश्वामरुतः पृश्नि
मातरः शुभंय्यावानोव्विदथेषुजग्मयः ॥ अग्निजिह्वामनवः सूरचक्षसो
व्विश्वेनोदेवाऽअवसागमन्निह ॥ ७ ॥ भद्रंकर्णेभिः शृणुयामदेवाभद्रम्प
श्येमाक्षभिर्य्यजत्राः स्थिरैरङ्गैस्तुष्टुवा ᳪसस्तनूभिर्व्व्यशेमहिदेवहितं यदा
युः ॥८॥ शतमिन्नुशरदोः अन्तिदेवायत्रानश्चक्राजरसन्तनूनाम् ॥ पुत्रा

सोयत्रापितरोभवन्ति मानोमध्यारीरिषतायुर्गन्तोः ॥ अदितिर्द्यौरदि
पं० तिरन्तरिक्षमदितिर्म्मातासपितासपुत्रः॥ बिश्वेदेवाऽअदितिअदितिःपञ्चना प०
॥२॥ ज्जातमादितिर्ज्जनित्वम् ॥१०॥ तम्पत्नीभिरनु ॥ गच्छेमदेवाः पुत्रैर्भ्रातृभिरु
तवाहिरण्यै ॥ नाकंगृभ्णानाः सुकृतस्य लोकेतृतीये पृष्ठेऽअधि रोचनेदि
वः ॥ ११ ॥ आयुष्यंव्वर्च्चस्यर्ठरायस्पोषमौद्भिदम् ॥ इदर्ठंहिरण्यंव्वर्च्च
स्वज्जैत्रायाविशतादमाम् ॥ १२ ॥ द्यौःशान्तिरन्तरिक्षर्ठशान्तिःपृथिवी
शान्तिरापःशान्तिरोषधयः शान्तिःव्वनस्पतयः शान्तिर्व्विश्वेदेवाः शा
न्तिब्रह्मशान्तिःसर्वर्ठशान्तिरेवशान्तिःसामाशान्तिरेधि ॥१॥ यतोयतःस ॥२॥
मीहसततो नोऽअभयंकुरु॥शन्नःकुरुप्रजाभ्योभयन्नःपशुभ्यः॥२॥सुशान्ति

Indira Gandhi National Centre for the Arts

र्भवतु ॥ ॐश्रीमन्महागणाधिपतयेनमः ॥ ॐलक्ष्मीनारायणाभ्यांन्नमः
ॐउमामहेश्वराभ्यान्नमः ॥ ॐवाणीहिरण्यगर्भाभ्यांनमः ॥ ॐशची
पुरंदराभ्यांनमः ॥ ॐमातृपितृचरणकमलेभ्योनमः ॥ ॐकुलदेवताभ्यो
नमः ॥ॐइष्टदेवताभ्योनमः॥ॐग्रामदेवताभ्योनमः ॥ॐस्थानदेवाताभ्यो
नमः॥ ॐवास्तुदेवताभ्योनमः॥ॐसर्बेभ्योदेवेभ्यःसर्वभ्योब्राह्मणेभ्योनमो
नमः ॥ ॐपुण्यंपुण्यांहंदीर्घामायुरस्तु॥सुमुखश्चैकदन्तश्चकापिलोगजकरण
कः॥लंवोदरश्चविकटोविघ्ननाशोगणाधिपः॥ धूम्रकेतुर्गणाध्यक्षोभालचंद्रो
गजाननः ॥ द्वादशैतानिनामानियः पठेच्छृणुयादपि ॥ बिद्यारम्भेबिबाहे
चप्रबेशेनिर्गमेतथा ॥ संग्रामेसकटेचैवाबिघ्नस्तस्यनजायते ॥ ३ ॥ वक्रतुंड

Indira Gandhi National Centre for the Arts

पं० महाकायसूर्यकोटिसमप्रभ ॥ अबिघ्नंकुरुमेदेवसर्वकार्येषुसर्वदा ॥४॥ शुक्ला प०
म्बरधरंदेवंशशिवर्णंचतुर्भुजं ॥ प्रसन्नवदनंध्यायेत्सर्वविघ्नोपशांतये ॥ ५ ॥
॥ ३ ॥ अभीप्सितार्थसिध्यर्थंपूजितोयःसुरासुरैः ॥ सर्वविघ्नहरस्तस्मैगणाधिपत
येनमः ॥ ६ ॥ सर्वमंगलमंगल्येशिवेसर्वार्थसाधिके ॥ शरण्येत्र्यंबकेगौरि
नारायणिनमोस्तुते ॥ ७ ॥ सर्वदासर्वकार्येषुनास्तितेषाममंगलम् ॥ येषांहृ
दिस्थोभगवान्मंगलायतनोहरिः ॥८॥ लाभस्तेषांजयस्तेषांकुतस्तेषांपरा
जयः ॥ येषामिंदीवारश्यामोहृदयस्थोजनार्दनः ॥९॥ विनायकंगुरुंभानुंब्र ॥ ३ ॥
ह्मविष्णुमहेश्वरान्सरस्वतीम्प्रणम्यादौसर्वकार्यार्थसिद्धये ॥ १० ॥ तदेवल
ग्नंसुदिनंतदेवतारावलञ्चन्द्रवलन्तदेव विद्यावलन्दैववलन्तदेवलक्ष्मीपतेतें

Indira Gandhi National Centre for the Arts

अत्रस्वतिपुण्याहवाचनमित्यादिसङ्कल्यसत्कातत्रादौनिर्विघ्नतासिध्यर्थगणेशाम्बिकयोःपूजनङ्करिष्यइत्यप्याचार ॥ २ ॥

घ्रियुगस्मरामि॥ ११॥यत्रयोगेश्वरःकृष्णोयत्रपार्थोधनुर्द्धरःतत्रश्रीविजयोभू
तिर्ध्रुवानीतिर्मतिर्मम ॥ १२ ॥ सर्वेष्वारम्भकार्येषुत्रयास्त्रिभुवनेश्वराः ॥
देवादिशंतुनः सिद्धिंब्रह्मेशानजनार्दनाः ॥ १३ ॥ ॐविष्णुः ३ पुण्य
तिथावमुकशर्म्मणः ॥ सुतस्यसुतापावाश्वोऽद्यवाऽमुकसंस्काराख्यकर्माह
ङ्करिष्ये तदंगत्वेनगणपतिपूजनस्वास्तिपुण्याहवाचनमातृकापूजनवसोर्द्धा
रोआयुष्पजयनान्दीश्राद्धान्यहंकरिष्ये ॥ तत्रादौकर्मार्थजलपूरितकलशा
र्चनम् ॥ ॐतत्वायामिब्रह्मणाव्वन्दमानस्तदाशास्तेयजमानोहविर्भिः ॥
अहेडमानोव्वरुणेहवोध्युरुशंठ समानऽआयुःप्रमोषीः ॥ १॥ कलसेवरुणा

Indira Gandhi National Centre for the Arts

यनमः गंधाक्षतपुष्पैः संपूज्य ॥ ततोदक्षिणहस्तेनकलशमालभ्याभिमंत्र
येत ॥ कलशस्यमुखेविष्णुः कंठेरुद्रः समाश्रितः ॥ मूलेतस्यस्थितोब्रह्माम
ध्येमातृगणाःस्मृताः ॥ कुक्षौतुसागराःसर्वेसप्तदीपावसुंधराः ॥ ऋग्वेदोथ
यजुर्वेदः सामवेदोह्यथर्वणः ॥२॥ अंगैश्चसहिताः सर्वेकलशन्तुसमाश्रिताः
इत्यभिमंत्र्य ततोगंगाद्यावाहनम् ॥ गंगेचयमुनेचैवगोदावरिसरस्वती॥
नर्मदेसिन्धुकावेरीजलेस्मिन्सन्निधिंकुरु ॥ १ ॥ अस्मिन्कलशेसर्वाणिती
र्थान्यावाहयामिपूजयामि ॥ नमस्करोमि ॥ कलशोदकेनपूजासंभारान्सं
प्रोक्ष्य ॥ तत्रमंत्रः ॥ ॐअपवित्रःपवित्रोवासर्वावस्थांगतोपिवा ॥ यःस्मरे
त्पुंडरीकाक्षंसबाह्याभ्यंतरेशुचिः ॥ १ ॥ इतिमंत्रेणप्रोक्षयेत् ॥ दीपपूजनम्



Indira Gandhi National Centre for the Arts

भोदीपत्वंब्रह्मरूपस्त्वंधकारनिवारकः इमांमयाकृतांपूजांगृणहंस्तेजःप्रव
र्द्धय ॥ १ ॥ दीपायनमः गंधाक्षतपुष्पैः सम्पूज्य अथगणपतिपूजनं ॥ ततो
ध्यानम् ॥ श्वेताङ्गंश्वेतवस्त्रंसितकुसुमगणैःपूजितंश्वेतगंधैः क्षीराब्धौरत्नदी
पैः सुरतरु बिमलेरत्नसिंहासनस्थं ॥ दोर्भिः पाशांकुशेष्टाभयधृतिविशदंचं
द्रमौलिंत्रिनेत्रंध्यायेशांत्यर्थमीशंगणपतिममलंश्रीसमेतंप्रसन्नम् ॥१॥ॐभू
र्भुवःस्वःसिद्धिबुद्धिसहितमहागणपतयेनमःध्यायामि ॥हेहेरंबत्वमेत्येहिअ
म्बिकात्र्यंबकात्मज सिद्धिबुद्धिपतेत्र्यक्षलक्षलाभापितुःपितः॥१॥ नागास्य
नागहारत्वंगणराजचतुर्भुज भूषितःस्वायुधैर्दिव्यैःपाशांकुशपरश्वधैः ॥२॥
आवाहयामिपूजार्थंरक्षार्थंचममक्रतोः ॥ इहागत्यगृहाणत्वंपूजांक्रतुंचरक्ष

Indira Gandhi National Centre for the Arts

पं० मे ॥३॥ ॐगणानान्त्वागणपतिर्ठ.हवामहेप्रियाणान्त्वाप्रियपतिर्ठ.हवामहे प०
निधीनांत्वानिधिपतिर्ठ. हवामहेवसोमम आहमजानिगर्भधमात्वमजा
॥ ५ ॥ सिगर्भधम् ॥ १ ॥ ॐभूःसिद्धिबुद्धिसहितमहागणपतयेनमःगणपतिमावा
हयामि ॥ रम्यंसुशोभनंदिव्यंसर्वसौख्यकरंशुभम् ॥ आसनञ्चमयादत्तंगृहा
णपरमेश्वर २॥ॐवर्ष्मोस्मिसमानानामुद्यतामिवसूर्यःइमन्तमभितिष्ठामि
योमाकश्चाभिदासति ॥२॥ ॐभूःसिम आसनंसमर्पयामिऊष्णोदकन्निर्मलञ्च
सर्वसौगन्ध्यसंयुतम् ॥ पादप्रक्षालनार्थायदत्तंतेप्रतिगृह्यताम् ३ ॐएतावान ॥ ५ ॥
स्यमहिमातोज्यायांश्चपूरुषःपादोस्यविश्वाभूतानित्रिपादस्यामृतान्दिवि
॥३॥ ॐभू.सि.म.ग.पाद्यंस॥ताम्रपात्रेस्थितंतोयंगंधपुष्पफलान्वितम्॥साहि

Indira Gandhi National Centre for the Arts

रण्यन्ददाम्यर्घंगृहाणपरमेश्वर॥४॥ॐधामन्तेविश्वम्भुवनमधिश्रितमन्तः
समुद्रेहृद्यन्तरायुषि ॥ अपामनीकेसमिथेयऽआभृतस्तमश्याममधुमन्त
ऽऊर्मिम् ॥४॥ ॐभू.सि.म.अर्घंस.॥सर्वतीर्थसमायुक्तंसुगंधिनिर्मलंजलम् ॥
आचम्यार्थंमयादत्तंगृहाणपरमेश्वर॥५॥ ॐइमम्मेवरुणश्रुधीहवमद्याचमृ
डय ॥ त्वामवस्युराचके ॥ ५ ॥ ॐभू.सि.म.आचमनंसम: ॥ पंचामृतस्नानं
॥ कामधेनुसमुद्भूतंसर्वेषांजीवनंपरम् ॥ पावनंयज्ञहेतुश्चपयःस्नानार्थं मर्पि
तम् ॥ १ ॥ ॐपयः पृथिव्याम्पयऽओषधीषुपयोदिव्यन्तरिक्षेपयोधाः ॥
पयस्वतीः प्रदिशः सन्तुमह्यम् ॥ १ ॥ ओंभू.सिम.पयःस्नानंस.पयःस्नाना
न्तेसुद्धोदकस्नानंस.॥पयसस्तुसमुद्भूतंमधुराम्लंशशिप्रभं ॥ दध्यानीतंमया
Indira Gandhi National Centre for the Arts

देवस्नानार्थंप्रतिगृह्यताम् ॥२॥ ॐदधिक्राव्णोऽअकारिषञ्जिष्णोरश्वस्यवा
जिनः॥ सुरभिनोमुखाकरत्प्रणऽआयूᳬंषितारिषत ॥ २ ॥ ॐभू. सि. म.
दधिस्नातंततःशुद्धोदकस्नानम्॥नवनीतसमुत्पन्नंसर्वसंतोषकारकम् घृतंतुभ्यं
प्रदास्यामिस्नानार्थंप्रतिगृह्यताम्॥ ३ ॥ॐघृतम्मिमिक्षेघृतमस्ययोनिर्घृते
श्रितोघृतम्वस्यधाम॥ अनुष्वधमावहमादयस्वस्वाहाकृतंवृषभव्वाक्षिहव्य
म् ॥३ ॥ ॐभू.सि.म.घृतस्नानंसःघृतस्नानान्तेशु. तरुपुष्पसमुद्भूतंसुस्वादुम
धुरंमधु ॥ तेजः पुष्टिकरंदिव्यस्नानार्थंप्रतिगृह्यताम् ॥ ४ ॥ ॐमधुव्वाताऽ
ऋतायतेमधुक्षरन्तिसिन्धवः ॥ माध्वीर्न्नः सन्त्वोषधीः॥१॥मधुनक्तमुतोष
सोमधुमत्पार्थिवᳬंरजः ॥ मधुद्यौरस्तुनः पिता मधुमान्नोव्वनस्पतिर्म्मधु

Indira Gandhi National Centre for the Arts

माँ ॥२॥ऽअस्तुसूर्य्यः ॥ माध्वीर्गावोभवन्तनः ॥३॥ ४ ॥ ओंभूःसि.म.मधु
स्नानंस. ॥ म.शु.इक्षुमारससमुद्भूताशर्करापुष्टिकारिका॥मलापहारिकादिव्या
स्नानार्थंप्रतिगृह्यताम् ॥ ५॥ ओंअपाꣳ रसमुद्वयसꣳ सूर्येसन्तꣳ समाहित
म् ॥ अपाꣳ.रसस्यपयोरसस्तंव्वोगृण्हाम्युत्तममुपयामगृहीतोसीन्द्रायत्वाजु
ष्टंगृह्णाम्येषतेयोनिरिन्द्रायत्वाजुष्टतमम् ॥ ५ ॥ ॐभू. सि.म.शर्करास्नानंस
म.शु. ॥ नानासुगंधद्रव्यश्चचंदनंरजनीयुतम् ॥ उद्वर्तनंमयादत्तंगृहाणपर
२ मेश्वर ॥ १ ॥ ॐगन्धर्व्वस्त्वाविश्वावसुः परिधातुव्विश्वस्यारिष्टोयजमा
नस्यपरिधिरस्यग्निरिडऽईडितः ॥ १ ॥ ॐभू. सि. म. उद्वर्तनस्नानंस.उद्वर्त
नस्नानान्तेशुद्धोदकस्नानंस.कावेरीनर्मदावेणीतुंगभद्रासरस्वती ॥ गंगाच

Indira Gandhi National Centre for the Arts

पं० यमुनातोयंमयास्नानार्थमर्पितम् ॥ १ ॥ ॐआपोहिष्ठामयोभुवस्तानऽऊ प०
र्जेदधातन॥महेरणायचक्षसे॥योवःशिवतमोरसस्तस्यभाजयतेहनः ॥ उश
॥ ७ ॥ तीरिवमातरः ।२।तस्माऽअरङ्गमामवोयस्यक्षयायजिन्वथ।आपोजनयथा
चनः॥ॐभूःसिमशुद्धोदकस्नानमभिषेकश्चस॥शान्तिःशान्तिःशान्तिःसुशा
न्तिःन्तिर्भवतु॥ॐभू.सि.स्नानान्ते आचमनंसःसर्वभूषादिमेसौम्येलोकल
ज्जानिवारणे ॥ मयोपपादितेतुभ्यंवाससीप्रतिगृह्यताम्॥१॥ॐयुवासुवासाः
परिवीतऽआगात्सऽउश्रेयान्भवतिजायमानः॥ तंधीरासःकवयऽउन्नयन्ति ॥ ७ ॥
स्वाधोमनसादेवयन्तः ॥ २ ॥ ॐभू.सि-म-वस्त्रंस ॥ नवभिस्तंतुभिर्युक्तं
त्रिगुणंदेवतामयं ॥ उपवीतंमयादत्तंगृहाणपरमेश्वर ॥ १ ॥ ॐयज्ञोपवीतं

Indira Gandhi National Centre for the Arts

परमम्पवित्रम्प्रजापतेयत्सहजम्पुरस्तात ॥ आयुष्यमग्र्यम्प्रतिमुञ्चशुभ्रंय
ज्ञोपवीतंबलमस्तुतेजः ॥१॥ ॐभूः सि.म. यज्ञोपवीतम ॥ आचमनम ॥ श्रीखं
डचन्दनन्दिव्यंकेशरादिसमन्वितम ॥ विलेपनंसुरश्रेष्ठचन्दनम्प्रतिगृह्यता
म ॥ॐ अर्ठशुनाते। अर्ठशुष्टच्यताम्परुषापरुः॥गन्धस्तेसोममवतुमदायरसा
ऽच्युतः ॥ १ ॥ ॐभू. सि. म. चदनंसा अक्षताश्चसुरश्रेष्ठकुंकुमक्ताःसुशोभिताः
मयानिवेदिताभक्त्यागृहाणपरमेश्वर ॥१॥ ॐ अक्षन्नमीमदन्तत्द्यवप्रियअधू
षत ॥ अस्तोषतस्वभानवोविष्प्रान विष्ठयामतीयोजान्विन्द्रतेहरि ॥१॥ॐ
भू. सि. मः अक्षतान्सः।सुमाल्यानीसुगंधीनिमालत्यादीनिवैप्रभो॥मयाहृता
निपूजार्थंपुष्पाणिप्रतिगृत्द्यताम ॥ १॥ ॐ ओषधीः प्रतिमोदध्वम्पुष्यवतोः

Indira Gandhi National
Centre for the Arts

प्रसूवरीः॥अश्वाइवसजित्वरीर्व्वीरुधः पारपिष्णवः॥१॥ ॐभू.सि.म, पुष्पाणि
मदूर्वांकुरान्सुहरितानमृतान्मंगलप्रदान् ॥ आनीतांस्तवपूजार्थंगृहाणगण
नायक।१।ॐकाराण्डात्काण्डात्प्ररोहन्तीपरुषःपरुषस्परि एवानोदूर्व्वेप्रतनु
सहस्रेणशतेनच ॥१॥ ॐभू.सि.म. दूर्वांकुरान्समः हरिद्राकुंकुमंचैवसिंदूरादि
समन्वितम् सौभाग्यद्रव्यसंयुक्तंगृहाणपरमेश्वर ॥१॥ सुगंधौषधिचूर्णंचना
नापरिमलानिच नानासुगंधतैलानिअतःशान्तिप्रयच्छमे ॥२॥ ॐअहिरि
वभोगैः पर्य्येतिवाहुज्ज्यायाहेतिम्परिवाधमानः हस्तघ्नोव्विश्वाव्वयुनानि
व्विद्वान्पुमान्पुमाप्ठसम्परिपातुव्विश्वतः२॥ॐभू.सि.म.नानापरिमलद्रव्या
णिसमर्पयामि॥ वनस्पतिरसोद्भूतोगंधाढ्योगंधउत्तमः॥आघ्रेयःसर्वदेवाना



Indira Gandhi National Centre for the Arts

धूपोयंप्रतिगृह्यताम् ॥ ॐधूरसिधूर्वधूर्व्वन्तन्धूर्व्वतंय्योस्मान्धूर्व्वतित ॥
न्धूर्व्वयम्वयन्धूर्व्वामः॥देवानामसिव्वन्हितमठंःसस्नितमम्पाम्प्रितमञ्जुष्ठ
तमन्देवहूतम ॥ १ ॥ ॐभूःसि.म.धूपंस.॥ साज्यंचवर्तिसंयुक्तंवन्हिनायो
जितंमया ॥ दीपंगृहाणदेवेशत्रैलोक्योतिमिरापहम ॥ १ ॥ ॐअग्निर्ज्यो
तिर्ज्योतिरग्निःस्वाहासूर्य्योज्योतिर्ज्योतिः सूर्य्यःस्वाहा ॥ अग्निर्व्वर्च्चोज्यो
तिर्व्वर्च्चः स्वाहासूर्य्योव्वर्च्चोज्योतिर्व्वर्च्चः स्वाहा ॥ ज्योतिःसूर्यःसूर्य्योज्यो
तिःस्वाहा॥१॥ॐभूःसि.म.दीपंसमर्पयामि ॥ शर्कराघृतसंयुक्तंमधुंस्वादुचो
त्तममउपहारसमायुक्तंनैवेद्यंप्रतिगृह्यताम ॥ १ ॥ ॐयेदेवासोदिव्येकादश
स्थपृथिव्यामव्येकादशस्थ ॥ अप्सुक्षितोमहिनैकादशस्थतेदवासोयज्ञमि

Indira Gandhi National Centre for the Arts

पं० मंजुषध्वम ॥ १ ॥ ॐभू. सिमनैवेद्यंस ॥ ॐभूपानीयंस. ॥ ॐभूःउतरापोश प०
नंस. ॐभू. हस्तप्रक्षालनंसमर्पयामि ॥ ॐभू. सि. म. मुखप्रक्षालनंस. ॥
॥ ९ ॥ ॐभू. चंदनेनकरोद्वर्तनंस. ॥ इदंफलंमयादेवस्थापितंपुरतस्तव । तेनमेस
फलावाप्तिर्भवेज्जन्मनिजन्मनि ॥ १ ॥ ॐयाःफलिनीर्याऽअफलाऽअपुष्पा
याश्चपुष्पिणीःबृहस्पतिप्रसूतास्तानोमुञ्चन्त्वꣳहसः ॥ १ ॥ ॐभू. सि. म.
फलंस. ॥ पूगीफलंम्महद्दिव्यंनागवल्लीदलैर्युतम्॥एलादिचूर्णसंयुक्तंतांबूलंप्र
तिगृह्यताम् ॥ १ ॥ यत्पुरुषेणहविषादेवायज्ञमतन्वत ॥ व्वसन्तोस्यासी ॥ ९ ॥
दाज्यंग्रीष्मऽइध्मःशरद्धविः १ ॥ ॐभू. सि. म. ताम्वूलंसं० ॥ हिरण्यगर्भ
गर्भस्थंहेमवीजंविभावसोः ॥ अनन्तपुण्यफलदमतःशांतिम्प्रपच्छमे ॥ १ ॥

Indira Gandhi National Centre for the Arts

ॐहिरण्यगर्भःसमवर्त्तताग्रेभूतस्यजातःपतिरेकआसीत् ॥ सदाधारपृथिवी
न्द्यामुतेमांकस्मैदेवायहविषाव्विधेम १ ॥ ॐभू. सि. म. दक्षिणांसः ॥
कदलीगर्भसंभूतंकर्पूरंचप्रदीपितम् । आरार्तिकमहंकुर्वेपश्यमेवरदोभव ॥
॥ १ ॥ ॐइदर्ठ. हविः प्प्रजननम्मेऽअस्तुदशवीरर्ठ. सर्व्वगणर्ठ. स्वस्तये ।
आत्मसनिप्प्रजासनिपशुसनिलोकसन्त्यभयसनि ॥ अग्निःप्प्रजाम्बहुला
म्मेकरोत्वन्तम्पयोरेतोऽअस्मासुधत्त १ ॥ ॐभू. सि. म. कर्पूरनीराजनं
स. ॥ नानासुगंधपुष्पाणियथाकालोद्भवानिच । पुष्पाञ्जलिर्मयादत्तोगृहाणं
परमेश्वर ॥ १ ॥ ॐयज्ञेनयज्ञमयजन्तदेवास्तानिधर्म्माणिप्प्रथमान्यासन् ॥
तेहनाकम्महिमानःसचन्तयत्रपूर्वेसाध्याःसन्तिदेवाः ॥ १ ॥ ॐभू. सि. म.

Indira Gandhi National Centre for the Arts

पं० पुष्पाञ्जलिंस । यानिकानिचपापानिज्ञाताज्ञातकृतानिच ॥ तानिसर्वाणिन पं०
श्यन्तिप्रदक्षिणपदेपदे १ ॐसप्तास्यासन्परिधयस्त्रिःसप्तसमिधःकृताः ॥
॥१०॥ देवायद्यज्ञन्तन्वानाऽअवन्धन्पुरुषंपशुम् १ ॐभू- सि. म. प्रदक्षिणांस अथ
विशेषार्घ. ॥ रक्षरक्षगणाध्यक्षरक्षत्रैलोक्यरक्षक ॥ भक्तानामभयंकर्तात्रा
ताभवभवार्णवात् ॥ १ ॥ द्वैमातुरकृपासिंधो षाण्मातुराग्रजप्रभोवरदत्वंव
रंदेहिवांच्छितंवांछितार्थद ॥ २ ॥ अनेनसफलार्घ्येणफलदोस्तुसदामम ॥
ॐभू । सि. म विशेषार्घंस ॥ प्रार्थनाविघ्नेश्वरायवरदायसुरप्रियायलंबोदरा
यसकलायजगद्धिताय ॥ नागाननायश्रुतियज्ञविभूषितायगौरीसुतायगण ॥१०॥
नाथनमोनमस्ते १ भक्तार्तिनाशनपरायगणेश्वरायसर्वेश्वरायशुभदायसुरे

Indira Gandhi National Centre for the Arts

श्वराय ॥ विद्याधरायविकटायचवामनायभक्तप्रसन्नवरदायनमोनमस्ते ॥
॥ २ ॥ नमस्तेब्रह्मरूपायविष्णुरूपायतेनमः ॥ नमस्तेरुद्ररूपायकरिरूपाय
तेनमः ॥ ३ ॥ विश्वरूपस्वरूपायनमस्तेब्रह्मचारिणे ॥ भक्तप्रियायदेवायन
मस्तुभ्यंविनायक ॥ ४ ॥ लंबोदरनमस्तुभ्यंसततंमोदकप्रिय ॥ निर्विघ्नंकुरु
मेदेवसर्वकार्येषुसर्वदा ॥ ५ ॥ त्वांविघ्नशत्रुदलनेतिचसुन्दरेतिभक्तप्रियेति
सुखदेतिवरप्रदेति ॥ विद्याप्रदेत्यघहरेतिचयेस्तुवंतितेभ्योगणेशवरदोभव
नित्यमेव ॥ ६ ॥ अनयापूजयासिद्धिबुद्धिसहितमहागणपतिः सांगःसपरि
वारः प्रीयताम् ॥ अथपुण्याहवचनप्रयोगः ॥ महीद्यौरितिभूमिंस्पृष्ट्वा ॥
ॐमहीद्यौःपृथिवीचनऽइमंयज्ञम्मिमिक्षताम । पिपृतान्नोभरीमभिः ॥

Indira Gandhi National Centre for the Arts

॥ १ ॥ ओषधयःसमितियवान्क्षिप्त्वा ॥ ॐओषधयःसमवदन्तसोमेनसह
राज्ञा ॥ यस्मैकृणोतिब्राह्मणस्तꣳराजन्पारयामसि ॥ १ ॥ आजिघ्रेमिति
कलशंस्थापयेत् ॥ ॐआजिघ्रकलशंम । ह्यात्वाविशन्त्विन्दवः ॥ पुनरू
र्ज्जानिवर्त्तस्वसानःसहस्रन्धुक्ष्वोरुधारापयस्वतीपुनर्म्माविशताद्रयिः ॥ १ ॥
ऽवरुणस्योत्तंभनमितिजलंपूरयेत् ॥ ॐऽवरुणस्योत्तम्भनमसिऽवरुणस्यस्क
म्भसर्ज्जनीस्थोऽवरुणस्यऽऋतसदनन्यासवरुणस्यऋतसदनमासीद १ अꣳ
शुनातइतिगंधंप्रक्षिपेत् ॥ ॐअꣳशुनातेऽअꣳशुःपृच्यताम्परुषापरुः ॥ गंध
स्तेसोममवतुमदायरसोऽअच्युतः १ ॥ याओषधीरितिसर्वौषधीः याओषधीः
पूर्व्वाजातादेवेभ्यस्त्रियुगम्पुरा ॥ मनैनुबभ्रूणामहꣳशतन्धामानिसप्तच ॥ १ ॥

प० ॥११॥

Indira Gandhi National Centre for the Arts

काण्डात्काण्डादितिदूर्वाः । ॐकाण्डात्काण्डात्प्ररोहन्ती॥१॥ अश्वत्थेवेति
पञ्चपल्लवान्ॐअश्वत्थेवोनिषदनम्पराणेंवोव्वसातिष्कृत ॥ गोभायऽइति
लासथयत्सनवथपूरुषम् ॥ १ ॥ स्योनापृथिवीतिसप्तमृदः । ॐस्योनापृथि
विनोभवान्नृक्षरानिवेशनी. यच्छानःशर्म्मसप्रथाः ॥ १ ॥ याःफलिनीरि
तिफलम् ॥ ॐया.फलिनीर्याऽअफलाः ॥ १ ॥ परिवाजपतिरितिपंचरत्ना
नि ॥ ॐपरिवाजपतिः कविरग्निर्हव्यान्यक्रमीत ॥ दधद्रत्नानिदाशुषे ॥
॥ १ ॥ हिरण्यगर्भइतिहिरण्यम् ॥ ॐहिरण्यगर्भःसम. ॥ १ ॥ युवासुवासाइ
तिरक्तसूत्रेणवेष्टयेत ॥ ॐयुवासुवासाःपरि । पूर्णादर्व्वीतिपूर्णपात्रमुपरिन्य
सेत ॥ ॐपूर्णादर्व्विपरापतसुपूर्णापुनरापत ॥ व्वस्नेवविक्रीणावहाऽइषमू

Indira Gandhi National Centre for the Arts

पं० र्यर्ठंः शतक्रतो ॥ १ ॥ तत्वायामीतिवरुणमावाह्य। ॐतत्वायामिब्रह्मणा पु०
व्वन्दमानस्तदाशास्तेयजमानोहविर्भिः ॥ अहेडमानोव्वरुणेहवोध्युरुश
॥ १२ ॥ ठंः समानऽआयुःप्प्रमोषीः ॥ १ ॥ वरुणंसाङ्गंसपरिवारंआवाहयामि ॥
मनोज्जुतिरिप्रतिष्टाप्यॐभूर्भुवः स्वःअपांपतिवरुणायनमइतिमंत्रेणषोड
शोपचारैःसंपूजयेत ॥ ततोगंगाद्यावाहनम् ॥ सर्वेसमुद्राःसरितस्तीर्थानिज
लदानदाःआयान्तुममशान्त्यर्थंदुरितक्षयकारकाः। ततःकलशाभिमंत्रण
मकलशस्यसुखेविष्णुःकंठेरुद्रःसमाश्रितःमूलेतस्यस्थितोब्रह्मामध्येमातृग
णाःस्मृताः ॥ १ ॥ कुक्षौतुसागराःसप्तसप्तद्वीपावसुंधरा ॥ ऋग्वेदोथयजुर्वेदः ॥ १२ ॥
सामवेदोह्यथर्वणःअंगैश्चसहिताःसर्वेकलशन्तुसमाश्रिताः ॥ ३ ॥ प्रार्थना।

Indira Gandhi National Centre for the Arts

देवदानवसंवादेमथ्यमानेमहोदधौ ॥उत्पन्नोसितदाकुंभविधृतोविष्णुनास्व
यम्॥१॥ त्वत्तोयेसर्वतीर्थानिदेवाःसर्वेत्वयिस्थिताःत्वयितिष्ठन्तिभूतानित्व
यिप्राणाःप्रतिष्ठिताः॥२॥शिवःस्वयंत्वमेवासिविष्णुस्त्वंचप्रजापतिः॥आदि
त्यावसवोरुद्राविश्वेदेवाःसपैतृकाः॥त्वयितिष्ठंतिसर्वेपियतःकामफलप्रदाः॥
त्वत्प्रसादादिमंयज्ञंकर्त्तुमीहेजलोद्भव ॥४॥ सान्निध्यंकुरुमेदेवप्रसन्नोभवस
र्वदा॥५॥नमोनमस्तेस्फटिकप्रभायसुश्वेतहारायसुमंगलाय ॥ सुपाशहस्ता
यझषासनायजलाधिनाथायनमोनमस्ते ॥१॥ पाशपाणेनमस्तुभ्यंपद्मिनी
जीवनायकपुण्याहवाचनंयावत्तावत्त्वंसन्निधौभव१ इतिप्रार्थना॥अथपुण्या
३ हवाचनम्॥अवनीकृतजानुमंडलःकमलमुकुलसदृशमंजलिंशिरस्याधाक॥

Indira Gandhi National Centre for the Arts

पं० यानन्तरंदक्षिणेनपाणिनास्वर्णपूर्णकलशंधारयित्वादीर्घानागानद्यो गिरय प०
स्त्रीणिविष्णुपदानिच ॥ ॐत्रीणिपदाविचक्रमेविष्णुर्गोपा अदाभ्यः॥अतो
॥१३॥ धर्माणिधारयन् ॥ १ ॥ तेनायुः प्रमाणेनपुण्यंपुण्याहंदीर्घमायुरस्त्विति
भवन्तोब्रुवन्त्वितियजमानः पुण्यंपुण्याहंदीर्घमायुरस्त्वितिद्विजाः ॥ एवं
सर्वत्रयजमानवचनोत्तरंब्राह्मणाःप्रतिवचनंदद्युः॥ब्राह्मणानाहस्तेषुप्रोक्षित
मस्तु ॥ अपाम्मध्येस्थितादेवाः सर्वमप्सुप्रतिष्ठिताः ॥ ब्राह्मणानांकरेन्य
स्ताशिवाआपोभवन्तुते ॥ १ ॥ शिवा आपः सन्तु ॥ ॐसन्तुशिवाआपः ॥१३॥
लक्ष्मीर्वसतिपुष्पेषुलक्ष्मीर्वसतिपुष्करे ॥ सामेवसतुवैनित्यंसौमनस्यन्तथा
स्तुनः ॥ १ ॥ सौमनस्यमस्तु ॥ अस्तुसौमनस्यम् ॥ अक्षतंचास्तुमेपुण्यं

Indira Gandhi National Centre for the Arts

अत्रगन्धापान्त्विितियजमानः सुमङ्गल्यश्चास्त्विति विप्राइत्यपिकेचितत्रमूलस्मृः यम् ॥ १ ॥

दीर्घमायुर्यशोवलम् यद्यच्छ्रेयस्करंलोकेतत्तदस्तुसदामम ॥ अक्षतंचारिष्टं चास्तु ॥ अस्त्वक्षतमरिष्टंच॥ गंधाःपातुसुमंगलयंचास्त्वितिभवन्तोब्रुवन्तु ॐगंधाः पान्तुसुमंगल्यश्चास्तु ॥ एवंसर्वत्र ॥ अक्षताः पान्तुआपुष्यमास्त्विव ॐअक्षताः पान्तुआयुष्यमस्तुपुष्पाणिपान्तुसौश्रियमास्त्विव. ॥ ॐपुष्पाणि पान्तुसौश्रियमस्तु ॥ तांबूलानिपांतुऐश्वर्यमस्त्विव-। ॐताम्बूलानिपांतुऐश्व र्यमस्तुदक्षिणाः पांतुवहुधनमस्त्विव- ॐदक्षिणाः पांतुबहुधनमस्तु ॥ पुनर त्राः पांतुस्वर्चितमस्त्विव॥ पुनरत्राः पान्तुस्वर्चितमस्तु॥ यजमानआचार्या दीन्प्रणम्यश्रीर्यशोविद्या विनयोवित्तंबहुपुत्रंडायुष्यंचास्त्वितिभवन्तोब्रु

Indira Gandhi National Centre for the Arts

 वन्तुइतिवदेत् तेचश्रीर्यशोविद्याविनयोवित्तंबहुपुत्रंचायुष्यंचास्तुइत्युक्त्वा 
दीर्घमायुः शान्तिः पुष्टिस्तुष्टिश्चास्त्वितियजमानंमूर्न्धर्यूभिर्षिंचेयुः ॥ यं
 कृत्वासर्ववेदयज्ञक्रियाकरणकर्मारंभाः शुभाः शोभनाः प्रवंर्तते तमहमों
कारमादिंकृत्वायजुराशीर्वचनंवहुऋषिमतंसमनुज्ञातंभवद्भिरनुज्ञातः पुण्यं
पुण्याहंवाचविष्येवाच्यताम् ब्राह्मणानांहस्तेअक्षतान्दद्यात् ॥ ॐभद्रंकर्णे
भिः ॥ शृणुयामदेवाभद्रंपश्येमाक्षाभिर्य्यजत्राःस्थिरैरङ्गैस्तुष्टुवार्ठसस्तनू
भिर्व्यशेमाहिदेवहितंय्यदायुः ॥ १ ॥ द्रविणोदाःपिपीषतिजुहोतप्रचतिष्टत
नेष्ट्राद्दतुभिरिष्यत ॥२॥ सवितात्वासवानाठं सुवतामग्निर्गृहपतीनाठंसोमो 
वनस्पतीनाम् ॥ वृहस्पतिर्वाचइन्द्रोज्यैष्टयापरुद्रःपशुभ्योमित्रः सत्योवरु

॥ अत्रयजमानोऽशक्तश्चेद्यजमानस्यगृहेशान्ति रस्त्वित्यादिविप्राएवपठेयुस्तत्र प्रतिवचनंनास्ति ॥ ५ ॥

णोधर्म्मपतीनाम्॥३॥नतद्रक्षाꣳसिनपिशाचास्तरन्तिदेवानामोजःप्रथमजꣳ ह्येतत् ॥ योविभर्ति दाक्षायणꣳ हिरण्यꣳ सदेवेषुकृणुतेदीर्घमायुः समनु ष्येषुकृणुतेदीर्घमायुः ४ उच्चातेजातमन्धसोदिविसद्भूम्याददे ॥ उग्रꣳशर्म महिश्रवः ॥ ५ ॥ उपास्मैगायतानरः पवमानायेन्दवे ॥ अभिदेवाँइयक्षते ॥ ६ ॥ इत्याशीर्वादः ॥ व्रतजपनियमतपः स्वाध्यायक्रतुदयादमदानावि शिष्टानांसर्वेषांब्राह्मणानांमनःसमाधीयताम्॥इतियजमानः॥समाहितमन सःस्मः॥इतिद्विजाः॥प्रसीदन्तुभवन्तः॥इतियजमानोब्रूयात् ॥ प्रसन्नाःस्मइ तिद्विजाब्रूयुः॥ततोयजमानोब्रूयात्॥ॐशान्तिरस्तु॥अस्त्विद्विजाःप्रतिवचनं सर्वत्रदद्युःॐपुष्टिरस्तु॥ॐतुष्टिरस्तु॥ॐवृद्धिरस्तु॥ॐअविघ्नमस्तु ॐआयुष्य

Indira Gandhi National Centre for the Arts

पं० मस्तु॥ॐ आरोग्यमस्तु॥शिवंकर्मास्तु ॐ कर्मसमृद्धिरस्तु ॥ॐ वेदसमृद्धिरस्तु प०
॥१५॥ ॐ यत्पापंरोगमशुभमकल्याणंतद्दूरेप्रातिहतमस्तु॥ॐ यच्छ्रेयस्तदस्तु
॥१५॥ ॐ उत्तरेकर्मणिनिर्विघ्नमस्तु ॥ ॐ उत्तरोत्तरमहरहरभिवृद्धिरस्तु ॥ ॐ उत्त
रोत्तराः क्रियाःशुभाःशोभनाः संपद्यन्ताम् ॐ तिथिकरणमुहूर्तनक्षत्रग्रहल
ग्नसंपदस्तु ॥ उदकसेकः ॥ ॐ तिथिकरणमुहूर्तनक्षत्रलग्नाधिदेवताः प्रीय
न्ताम् ॐ तिथिकरणेसमुहूर्ते सनक्षत्रेसग्रहेसाधिदेवतेप्रीयेतां ॐ दुर्गापांचा
ल्यौप्रीयेतां ॥ ॐ अग्निपुरोगाविश्वेदेवाः प्रीयंताम् ॥ इन्द्रपुरोगामरुद्गणाः
प्रीयन्ताम् ॥ ॐ माहेश्वरीपुरोगा उमामातरः प्रीयन्तां ॥ ॐ अरुंधतीपुरो ॥१५॥
गाएकपत्न्यः प्रीयन्ताम् ॥ ॐ विष्णुपुरोगाः सर्वेदेवाः प्रीयन्ताम् ॥ ॐ ब्रह्म

Indira Gandhi National Centre for the Arts

पुरोगेसर्वेवेदाःप्रीयन्ताम्॥ॐब्रह्मचब्राह्मणाश्चप्रीयंताम् ॐश्रीसरस्वत्यौप्रीये
ताम् ॥ ॐश्रद्धामेधेप्रीयेताम् ॥ ॐभगवतीकात्यामनीप्रीयंताम् ॥ ॐभग
वतीमाहेश्वरीप्रीयताम् ॐभगवतीऋद्धिकरी प्रीयतां ॐभगवतीसिद्धिकरी
प्रीयताम् ॥ ॐभगवतीपुष्टिकरीप्रीयताम् ॥ ॐभगवतीतुष्टिकरीप्रीयताम् ॥
ॐभगवन्तौविघ्नविनायकौप्रीयेताम् ॥ ॐसर्वाः कुलदेवताःप्रीयन्ताम् ॥
ॐसर्वाग्रामदेवताःप्रीयन्तां२१ ॐहताश्च ब्रह्मद्विषः॥ ॐहताश्चपरिपंथिनः॥
ॐहताश्चविघ्नकर्तारःशत्रवः पराभवंयान्तु॥ ॐशाम्यंतुघोराणि॥ ॐशाम्यं
तुपापानि॥ ॐशाम्यन्त्वीतः ॥६॥ ॐशुभानिवर्द्धन्ताम्॥ ॐशिवाआपः स
न्तु॥ॐशिवाऋतवः सन्तु॥ॐशिवाओषधयःसंतु॥ॐशिवानद्यःसन्तु॥ॐशि

SANS 133·55 PAN-

Indira Gandhi National Centre for the Arts

पं० वागिरयः सन्तु॥ॐशिवा अतिथयः सन्तु ॥ॐशिवा अग्नयः सन्तु ॐशिवा आहु
तयः सन्तु॥ॐ अहोरात्रे शिवे स्यातास्॥ ॐनिकामे निकामेनः पर्ज्जन्यो वर्षतु पं०
॥१६॥ फलवत्यो न ओषधयः पच्यन्तां ज्योगक्षेमो नः कल्पताम् १॥ ॐशुक्रांगारकबु
धवृहस्पतिशनैश्चरराहुकेतुसोमसहिता आदित्यपुरोगाः सर्वेग्रहाः पीयन्ता
म्॥ ॐभगवान्नारायणः प्रीयताम्॥ ॐभगवान्पर्जन्यः प्रीयताम् ॥ ॐभग
वान्स्वामी महासेनः सपत्नीकः ससुतः सपार्षदः सर्वस्था गतः प्रीयताम् ॥
ॐपुण्याहकालन्वाचयिष्ये॥ इतियजमानः ॥ ॐवाच्यताम् ॥ इतिवचनम् ॥
ब्राह्मंपुण्यंमहर्यच्चसृष्ट्युत्पादनकारकम् ॥ वेदवृक्षोद्भवंनित्यंतत्पुण्याहंब्रुव ॥१६॥



Indira Gandhi National Centre for the Arts

न्तुनः ॥ १ ॥ भोब्राह्मणाःममसकुटुम्बस्यसपरिवारस्यगृहे अमुककर्मणः
पुण्याहम्भवन्तोब्रुवन्तु ॥ पुण्याहम् एवंवचनंप्रतिवचनंचत्रिःपठित्वा ॥
ॐपुनस्तुमादेवजनाः पुनन्तुमनसाधियः॥ पुनन्तुविश्वाभूतानिजातवेदः
पुनीहिमा पृथिव्यामुद्धृतायान्तुयत्कल्याणंपुराकृतंऋषिभिः सिद्धगन्धर्वै
स्तत्कल्याणंब्रुवन्तुनः ॥ भोब्राह्मणाममसकुटुम्बस्यसपरिवारस्यगृहेअमु-
कर्मणाः कल्याणम्भः कल्याणम् ॥ ३ ॥ ॐयथेमांवाचंकल्याणीमावदा
निजनेभ्यःब्रह्मराजन्याभ्यार्ठशूद्रायचार्यायचस्वायचारणायच ॥ प्रियोदे
वानांदक्षिणायैदातुरिहभूयासमयम्मेकामः समृद्धतामुपमादोनमतु ॥२॥
सागरस्यतुयातुयाऋद्धिर्महालक्ष्म्यादिभिः कृतासंपूर्णा सुप्रभावाचतांच

Indira Gandhi National
Centre for the Arts

पं० ऋद्धिंब्रुवन्तुनः ॥भोब्राःमम.ऋ.भ.ऋध्यताम् ३ॐसर्वत्रस्यऽऋद्धिरस्यगन्म पं०
ज्योतिरमृताऽअभूम । दिवम्पृथिव्याऽअध्यारुहामाविदामदेवान्त्स्वर्ज्यो
॥१७॥ तिः ॥३॥ स्वस्तिस्तुयाऽविनाशाख्यापुण्यकल्याणवृद्धिदाविनायकप्रिया
नित्यन्ताञ्चस्वस्तिंब्रुवन्तुनः ॥ भोब्राह्मणाममः स्व. ब्रु. आयुष्मतेस्वस्तिः
॥ ३ ॥ ॐस्वस्तिनऽइन्द्रोवृद्धश्रवाः स्वस्तिनःपूषाविश्ववेदाः॥स्वस्तिनस्ता
र्क्ष्योऽअरिष्टनेमिः स्वस्तिनोबृहस्पतिर्दधातु ॥ ४ ॥ समुद्रमथनाज्जाताजग
दानन्दकारिका ॥ हरिप्रियाचमांगल्याताञ्चश्रियंब्रुवन्तुनः ॥ भो.मम, श्रि ॥१७॥
यम् भ. अस्तुश्रीः ॥ ३ ॥ श्रीश्चतेलक्ष्मीरिति. ॥ ५ ॥ मृकण्डसूनोरायुर्यद्ध्रु
वलोमशयोस्तथा ॥ आयुषातेनसंयुक्ताजीवेमशरदः शतम् ॥ शतञ्जीवन्तु

Indira Gandhi National Centre for the Arts

भवन्तः ॥ १ ॥ ॐशतमिन्नुशरदोऽन्तिदेवायनश्चक्राजरसन्तनूनाम् ॥ पुत्रा
सोयत्रपितरोभवन्तिमानोनामद्धारीरिषतायुर्गन्तोः ॥ ६ ॥ शिवगौरीवि
वाहेया याश्रीरामेनृपात्मजे ॥ धनदस्यगृहेयाश्रीरस्माकंसास्तुसद्मनि ॥
अस्तुश्रीः ॥ ३ ॥ मनसः काममा । कूतिंवाचःसत्यमशीय ॥ पशूनार्ठरूप
मन्नस्यरसोयशः श्रीः श्रयतामपिस्वाहा ॥ ७ ॥ प्रजापतिर्लोकपालोधाता
ब्रह्माचदेवराट् ॥ भगवांशाश्वतोनित्यंसनोरक्षतुसर्वतः॥ भगवान्प्रजापतिः
प्रीयताम् ॥ ॐप्रजापतेनत्वदेतान्यन्योविश्वारूपाणिपरितावभूव ॥ यत्का
मास्तेजुहुमस्तन्नोऽअस्त्वयममुष्यापितासावस्यापितावयर्ठ ॥ स्यामपतयो
रयीणाम् ॥ ८ ॥ आयुष्मतेस्वस्तिमतेयजमानायदाशुषेश्रियेरत्नाशिष·

Indira Gandhi National Centre for the Arts

पं० सन्तुऋत्विग्भिर्वेदपारगैः देवेन्द्रस्ययथास्वस्तियथास्वास्तिर्गुरोर्गृहे॥एकलिं पं०
गेयथास्वस्तिस्तथास्वास्तिःसदाममा आयुष्मतेस्वस्तिः॥३॥ ॐप्रतिपन्था
॥१८॥ मपद्महिस्वस्तिगामनेहसम् ॥ येनविश्वाःपरिद्विषोवृणक्तिविन्दतेवसु ॥
॥९॥ अस्मिन्पुण्याहवाचनेन्यूनातिरिक्तोयोविधिःसउपविष्टब्राह्मणानां
वचनात् ॥ श्रीमन्महागणपतिप्रसादात्परिपूर्णोऽस्त्वितिभवंतोब्रुवन्तु ॥
अस्तुपरिपूर्णः अनेनपुण्याहवाचनेनप्रजापतिः प्रीयताम् ॥ ततोऽभिषेकः॥
अभिषेकेपत्नीवामतउपविशेत् ॥ कलशोदकंगृहीत्वाऽविधुराश्चत्वारोब्रा ॥१८॥
ह्मणादूर्वाम्रपल्लवैर्यजमानमभिषिंचेयुः ॥ तत्रमंत्राः ॥ ॐपयः पृथिव्यां ॥
॥१॥ ॐपञ्चनद्यःसरस्वतीमपियन्तिसस्रोतसः सरस्वतीतुपञ्चधासोदेशेभ

Indira Gandhi National Centre for the Arts

भवत्सरित २ व्वरुणस्योत० ॥ ३ ॥ पुनन्तुमादेवजनाःपु० ॥ ४ ॥ देवस्यत्वा
सवितुःप्प्रसवेंश्विनावाहुभ्याम्पूष्णोहस्ताभ्याम् ॥ सरस्वत्यैव्वाचोयन्तु
र्य्यन्त्रियेदधामिवृहस्पतेष्ट्वसाम्राज्येनाभिषिञ्चाम्यसौ ॥ ६ ॥ देवस्यत्वासर
स्वत्यैव्वाचोयन्तुर्य्यन्त्रेणाग्नेःसाम्म्राज्येनाभिषिञ्चामि ॥ ७ ॥ देवस्यत्वा० ॥
अश्विनोर्भैषज्येनतेजसेब्रह्मव्वर्च्चसायाभिषिञ्चामि सरस्वत्यैभैषज्येनवी
र्यायान्नाद्यायाभिषिञ्चामीन्द्रस्येन्द्रियेणवलायश्रियैयशसेभिषिञ्चामि ॥ ८ ॥
व्विश्वानिदेवसवितुर्दुरितानिपरासुव ॥ यद्भद्रंतन्नऽआसुव ॥ ९ ॥ धामच्छ
४ दग्निरिन्द्रोब्रह्मादेवोवृहस्पतिः ॥ सचेतसोव्विश्वेदेवायज्ञम्प्रावन्तुनःशुभे ॥
॥ १० ॥ त्वंय्यविष्टदाशुषोनॄःपाहि० शृणुधीगिरः ॥ रक्षातोकमुतत्मना ॥

पं०

॥३९॥

॥ १ ॥ अन्नपतेन्नस्यनोधेह्यनमीवस्यशुष्मिणः ॥ प्रप्रदातारन्तारिषऽऊ
र्य्यन्नोधेहिद्विपदेचतुष्पदे ॥ १२ ॥ द्यौःशांतिरन्त० ॥ १३ ॥ यतोयतःसमी
हसे ॥१४॥ सुरास्त्वामभिषिञ्चन्तुब्रह्मविष्णुमहेश्वराः ॥ वासुदेवोजगन्नाथ
स्तथासंकर्षणोविभुः ॥ १ ॥ प्रद्युम्नश्चानिरुद्धश्चभवन्तुविभवायते ॥ आख
ण्डलोग्निर्भगवान्यमोवैनिर्ऋतिस्तथा ॥ २ ॥ वरुणःपवनश्चैवधनाध्यक्ष
स्तथाशिवः ॥ ब्रह्मणासहिताःसर्वेदिक्पालाःपान्तुवःसदा ॥ ३ ॥ कीर्तिर्ल
क्ष्मीर्धृतिर्मेधाश्रद्धापुष्टिःक्रियामतिः ॥ बुद्धिर्लज्जावपुःशांतिर्मायानिद्राच
भावना ॥ ४ ॥ एतास्त्वामभिषिञ्चंतुक्षमाकान्तीतथैवच ॥ आदित्यश्चन्द्र
माभौमोबुधोजीवोसितोऽर्कजः ॥ ५ ॥ ग्रहास्त्वामभिषिञ्चन्तुराहुःकेतुश्च

प०

॥३९॥

Indira Gandhi National Centre for the Arts

पूजिताः ॥ देवदानवगंधर्वायक्षराक्षसपन्नगाः ॥६॥ ऋषयोमनवोगावोदेव
मातरएवच ॥ देवपत्न्योध्रुवोनागादैत्याश्चाप्सरसांगणाः ॥ ७ ॥ अस्त्राणि
सर्वशस्त्राणिराजानोवाहनानिच ॥ ओषधयश्चरत्नानिकालश्चावयवाश्चये
॥ ८ ॥ सरितःसागराःशैलास्तीर्थानिजलदानदाः ॥ एतास्त्वामभिषिञ्चन्तु
सर्वकामार्थसिद्धये ॥ ९ ॥ अमृताभिषेकोस्तु ॥ शान्तिःशान्तिः शान्तिः॥
सुशान्तिर्भवतु ॥ ततःपुत्रवतीभिर्वृद्धसुवासिनीभिर्नीराजनंकार्यम् ॐअना
धृष्टापुरस्तादग्नेराधिपत्यऽआयुर्म्मेदाःपुत्रवती दक्षिणात्ऽइन्द्रस्याधिपत्ये
प्प्रजाम्मेदाःसुखदायश्चाद्देवस्य सवितुराधिपत्येचक्षुर्म्मेदाऽआश्रुतिरुत्तर
रापस्योषम्मेदाः ॥ विधृतिरुपरिष्ठाद्बृहस्यतेराधिपत्यऽओजोमेदाविश्वा

Indira Gandhi National Centre for the Arts

अस्मत्संप्रदाये ऽनाचरणात्प्रयोगोनात्रलिखितः ॥ ३ ॥

भ्योमानाष्टाभ्यस्याहिमनोरश्वासि ॥ १ ॥ इतिमंत्रेण ॥ अथमातृकापूजन
म् ॥ तत्रायंक्रमः ॥ अविघ्नोमण्डपश्चैवमातृणांपूजनंसकृत् ॥ वैश्वदेवंवसो
र्द्धारानन्दीश्राद्धमतःपरम् ॥ १ ॥ अविघ्नपूजनात्पूर्वंवैश्वदेवंविधायचततो
गोधूमादिधान्यपूरितेहरिद्रादिरंजितेमृन्मये अविघ्नाख्येकलशेमोदादिष
ड्विनायकमातॄणांप्रतिमाःकुंकुमेनलिखित्वावाहयेत् ॥तद्यथा ॥ मोदश्चैव
प्रमोदश्चसुमुखोदुर्मुखस्तथा ॥ अविघ्नोविघ्नकर्ताचषडेतेविघ्ननायकाः ॥१॥
ॐमोदायनमःमोदमावाहयामि ॥ ॐप्रमोदा॰प्रमोदमा॰ ॥२॥ ॐसुमुखाय॰
ॐसुमुखमा॰ ॥ ३ ॥ ॐदुमुखाय॰ दुर्मुखमा॰ ॥ ४ ॥ ॐअविघ्नाय॰ अविघ्न
मा॰ ॥ ५ ॥ ॐविघ्नकर्त्रैः विघ्नकर्तारमा॰ ॥ ६ ॥ मनोजूतिरितिप्रतिष्ठाप्ययपो



Indira Gandhi National Centre for the Arts

डशोपचारैःसंपूजयेत ॥ ॐभूर्भुवःस्वःमोदादिषड्विनायकाःसुप्रातिष्टिताव
रदाभवन्तु ॥ ॐमोदादिषड्विनायकेभ्योनमइतिनाममंत्रेणावाहनादिपुष्पां
जलिपर्यंतंपूजनंकार्यम ॥ अनयापूजयामोदादिषड्विनायकाःप्रीयन्ताम॥
ततस्तंभरोपणादिकटावरणद्वारपालकान्त संपादितमण्डपेमण्डपमातृ
काःस्थापयेदित्येकेततआचार्यहस्तेषुप्रोक्षितादिकंकार्यम । अत्राःपान्तु
सुप्रोक्षितमस्त्विवतिभवन्तोब्रुवन्तु ॥ ॐअत्राःपान्तुसुप्रोक्षितमस्तु । गन्धः
पान्तुसुमंगलयंचास्त्विवतिभ.॥ॐगंधाःपान्तुसुमंगलयश्चास्तु॥अक्षताःपान्तु
आयुष्यस्त्विवतिभः॥ॐअक्षता·पान्तुआयुष्यस्तु ॥ पुष्पाणिपान्तुसौश्रियम
स्त्विवतितिभः॥ॐपुष्पाणिपान्तुसौश्रियमस्तु॥ तांबूलानिपान्तुऐश्वर्यमस्त्विव

पं० तिभ.॥ॐ तांबूलानिपान्तुऐश्वर्यमस्तु ॥ दक्षिणाःपान्तुवहुधनमस्त्वितिभ.॥ १०
॥२१॥ दक्षिणाःपान्तुवहुधनमस्तु ॥ अपूपाःपान्तुवहून्नश्चास्त्वितिभ. ॥ ॐ अपू
पाःपान्तुवहून्नंचास्तु ॥ शाखादूर्वाः पान्तुवृद्धिरस्त्वितिभ. ॥ ॐ शा
खादूर्वाःपान्तुशाखापल्लवानांवृद्धिश्चास्तु ॥ ततआचार्येणदूर्वाशम्याम्रा
दिप्रशस्तवृक्षपत्राणांरक्तसूत्रेणपञ्चधावेष्टनंकार्यम् । आसांमंडपमातृसंज्ञा
ताश्चमंडपमातृर्मण्डपेवावंशपात्रेस्थापयित्वा । वसोःपवित्रमितिमंत्रेणय
जमानपत्न्याशाखासुतैलारोपणंकार्यम् ॥ ॐ वसोःपवित्रमसिशतधारंवसोः
पवित्रमसिसहस्रधारम् । देवस्त्वासवितापुनातुवसोः पवित्रेणशतधारेण ॥२१॥
सुप्वाकामधुक्षः ॥ १ ॥ अहिरिवभोगैरितिशाखासुहरिद्राकुंकुमादिसुगंधि

Indira Gandhi National Centre for the Arts

द्रव्येणोद्वर्तनम् ॥ ॐअहिरिवभोगैः ॥ १ ॥ निकामेतिउष्णोदकेनशाखा
स्नपनम् । ॐनिकामेनिकामेनः ॥ १ ॥ दधिक्राव्णोतिशाखासुदध्यक्षताव
न्दनम् ॥ ॐदधिक्राव्णोऽअ. ॥ ॐयाओषधीरितियजमानहस्तेशाखाग्रह
णम् ॥ ॐयाओषधीः ॥ १ ॥ ततोयजमानपत्न्याहस्तेशस्त्रगर्भपञ्चमीशाखा
दत्वाकाण्डात्काण्डादितिकण्डनंकार्यम् ॥ ॐकाण्डात्काण्डात्प्ररोहन्ती० ॥
॥ १ ॥ ततआग्नेयादिचतुर्षुमडपकोणस्तंभेषुक्रमेणचतस्त्रोमध्ये एकाएवं
स्थिरोभवेतिस्थिरीकरणम् ॥ अथवा वंशपात्रमध्येचतुर्षुकोणेषुचतस्त्रोम
ध्येएकाएवंस्थिरीकरणसंप्रदायः ॐस्थिरोभवव्वीड्वंगआशुर्भवव्वाज्यर्वन्॥

अहिरिवभोगैर्य्येतिवाहुञ्ज्यायाहेतिम्परिवाधमानः ॥ हस्तघ्नोविश्वाव्वयुनानिविद्वान्युमान्युमाठंसम्परिपातुविश्वतः ॥ ४ ॥

॥२२॥ पृथुर्भुवसुखदस्त्वमग्ने: पुरीषवाहण: ॥ १ ॥ तत्रायंक्रम: नन्दिनीनलिनीमै
त्राउमाचपशुवर्द्धिनी ॥ आग्नेयादिक्रमेणैवशाषास्तंभेप्रातिष्ठिता: ॥ १ ॥
ॐनंदिन्यैनम: नन्दिनीमावा. ॥ ७ ॥ ॐनलिन्यैनम: ॥ नलिनीमा ॥ ८ ॥
ॐमैत्रायै. मैत्रामा ॥ ९ ॥ ॐउमायै. उमामा. ॥ १० ॥ पशुवर्द्धिन्यै:पशु
वर्द्धिनीमा. ॥ ११ ॥ मनोजूतिरितिप्रातिष्टाय्यसर्वासातत्रेणषोडशोपचारै:पू
जनम् ॥ॐभूर्भुव:स्व:नन्दिन्यादिमंडपमातृभ्योनम:आवाहनादिषोडशो
पचारै:पूजयेत्॥ अनयापूजयानान्दिन्यादिमंडपमातर:प्रीयन्ताम्॥ततोगौ ॥२२॥
र्यादिमातरोवंशपात्रेपीतपटंप्रसार्यतदुपरिकुंकुमादिना लिखित्वावाक्षत

Indira Gandhi National Centre for the Arts

पुंजेषुपूगीफलेषुनिवेश्याः ॥ तत्रायंक्रमः ॥ गौरीपद्माशचीमेधासावित्री
विजयाजया॥देवसेनास्वधास्वाहामातरोलोकमातरः ॥१॥हृष्टिःस्तथातुष्टि
पुष्टिरात्मनः कुलदेवता ॥ गणेशेनाधिकाह्येतावृद्धौपूज्याश्चतुर्दश ॥ १ ॥ अ
त्रचतुर्दशपदसमाहारान्मातरोलोकमातरइतिसर्वासांविशेषणम् ॥ ॐगणे
शायनमः गणेशमावाहयामि ॥ ॐगौर्य्यैनमः गौरीमा. ॥१२॥ पद्मायै. प
द्मामा. ॥१३॥ ॐसच्यैन. शचीमा ॥१४॥ॐमधायै॥मेधामा॥१५॥ॐसावि
त्र्यै सावित्रीमा. ॥ १६ ॥ ॐविजयायै. विजयामा ॥१७॥ जयायै. जयामा
॥ १८ ॥ देवसेनायै. देवसेनामा ॥ १९ ॥ ॐस्वधायैन स्वधामा० ॥२०॥



Indira Gandhi National Centre for the Arts

स्वाहायै.स्वाहामा.॥ २१ ॥ हृष्ट्यै हृष्टिमा.॥ २२ ॥ पुष्ट्यै. पुष्टिमा.॥ २३ ॥
तुष्टैन तुष्टिमा.॥ २४ ॥ कुलदेवतायै० कुलदेवतामा ॥ २५॥ इत्यावात्द्य ॥
अथजलमातरः ॥ मत्सी कूर्मीचवाराही मांडूकीमकरीतथा ॥ ग्राहकीक्रौं-
चकीचैवसप्तैताजलमातरः ॥ १ ॥ कांस्येवाताम्रपात्रेवा प्रभूतजलपूरणम् ॥
तत्रमत्स्यादीरावात्द्यपूजयेज्जलमातृका॥२॥ॐमत्स्यैनमः मत्सीमावाहया
मि ॥ २६ ॥ ॐकूर्मै कुर्मीमा.॥ २७ ॥ ॐवारात्द्यै.वाराहीमा.॥ २८॥ माण्डु
वयै.माण्डकीमा ॥ २९ ॥ ॐमकर्यै.मकरीमा.॥३०॥ ग्राहवयै.ग्राहकीमा.
॥ ३१ ॐक्रौंचवयै.क्रौंचकीमा.॥ ३२॥ इत्यावात्द्य ॥ अथस्थलमातरः ॥ब्रा



Indira Gandhi National Centre for the Arts

ह्मीमाहेश्वरीचैवकौमारीवैष्णवीतथा ॥ वाराहीचतथेंद्राणीचामुंडासप्तमा
तर: ॥ १ ॥ ॐब्राह्मयै·ब्राह्मीमा.॥ ३३ ॐमाहेश्वर्यैन·माहेश्वरीमा· ॥ ३४ ॥
ॐकौमार्यैन·कौमारीमा·॥ ३५ ॥ वैष्ण०यैन वैष्णवीमा·॥ ३६ ॥ ॐवाराह्यै
वारा हीमा· ३७ ॐइन्द्राण्यै०इन्द्राणीमा ३८ ॐचामुंडायै· चामुंडामा:
॥ ३९ ॥ इत्यावात्द्य ॥ एता·गौर्यादिवच्छ्रुयें अथद्वारमातरा: ॥
जयन्तीमंगलाचैवपिंगलादाक्षिणे गृहात् ॥ आनंदवर्धिनीवामेमहाकाली
चनिर्गमे॥१॥गृहस्यदाक्षिणेभागेतिस्रोलेख्यास्तुमातर:॥ वामभागेतथाद्वेच
जयन्त्यादिक्रमेणतु२ॐजयन्त्यैनजयन्तीमा·४०मंगलायै·मंगलामा.४१
पिंगलाये· पिंगलामा ॥४२॥ इतिद्वारदाक्षिणे:॥ॐआनन्दवर्द्धिन्यै:आनन्द

Indira Gandhi National Centre for the Arts

॥२४॥ वर्धिनीमा ः॥४३॥ ॐमहाकाल्यै.महाकालीमा ः॥४४॥इतिवामे॥इत्यावाद्य॥
ततोगौर्यादिवतसूर्येगृहमातरःस्थाप्या.॥ कीर्तिर्लक्ष्मीर्धृतिर्मेधापुष्टिःश्रद्धा
क्रियामतिः ॥ वुद्धिर्लज्जावपुःशाँतिस्तुष्टिः कान्तिस्तुमातर. ॥१॥ ॐकीर्त्यै
न.कीर्तिमा. ॥ ४५ ॥ ॐलक्ष्म्यै.लक्ष्मीमा. ॥ ४६ ॥ ॐधृत्यैन.धृतिमा.
॥ ४७ ॥ ॐमेधायै.मेधामा ः ॥ ४८ ॥ पुष्ट्यैन ःपुष्टिमा. ॥ ४९ ॥ ॐश्रद्धायै
श्रद्धामा ः॥ ५० ॥ क्रियायै. क्रियामा. ॥ ५१॥ ओंमत्यैन ःमतिमावा. ॥५२॥
ॐवुद्ध्यैन ः वुद्धिमा ः ॥५३॥ ॐलज्जावपुषेन ःलज्जावपुषमा ः ॥५४ ॥ ओशान्त्यै ॥२४॥
न ः शान्तिमा ः ॥ ५५ ॥ ओंतुष्ट्यैन. तुष्टिमा. ॥ ५६॥ ओंकान्त्यैन.कान्तिमा

Indira Gandhi National Centre for the Arts

॥ ५७ ॥ इत्यावाह्य ॥ अथघृतमातरः ॥ एताःकुड्येसूर्पेवाकुंकुमाक्तेनघृते
नदक्षिणोत्तरा पूर्वाभिमुखालेख्याःश्रीर्लक्ष्मीर्धृतिर्मेधापुष्टिःश्रद्धासरस्वती॥
मांगल्येषुप्रपूज्यन्तेसप्तैताघृतमातरः॥ १ ॥ ॐश्रियैनमःश्रियमा: ॥ ५८ ॥
यों लक्ष्म्यैन. लक्ष्मीमा.॥ ५९ ॥ योंधृत्यैनः धृतिमा. ॥६०॥ मेधायैनःमेधा.
॥ ६१ ॥ पुष्टयैनः पुष्टिमाः ॥ ६२॥ ॐश्रद्धायैनः श्रद्धामा. ॥ ६३ ॥ ॐसरस्व
त्यैनमःसरस्वतीमावाहयामि ॥ ६४ ॥ इत्यावाह्य ॥ एवंषड्विनायकादि
घृतमातृकांतश्चतुःषष्टिमातृणांस्थापनम्॥ मनोजूतिरितिमंत्रेणप्रतिष्ठाप्य
समख्येदेव्याधियाइतिमंत्रेणसर्वाःषोडशोपचारैःसंपूजयेत् ॥ ॐसमख्येदे
व्याधियासन्दक्षिणयोरुचक्षसा॥ मामऽआयुःप्प्रमोषीर्मोऽअहन्तवव्वीरंवि

ॐव्वसोः पवित्रमसिशतधारम्व्वसोः पवित्रमसिसहस्रधारमा देवस्त्वासवितापुनातुव्वसोः पवित्रेणशतधारेणसुप्वाकामधुक्षः ३॥ प०

देयतवदेविसन्दृशी ॥ १ ॥ ततःकुड्येआवाहितघृतमातॄणामुपरिनागवल्ली
दलेनगुडयुक्तेनकेवलेनवाघृतेनाभितोधारांव्वसोःपवित्रमितिमंत्रेण पात
येत् ॥ साचप्रत्यगादिःप्राक्संस्थादाक्षिणादिरुदक्संस्थावाॐव्वसोंःपवित्रम्
॥तद्यथा ॥ कुड्यलग्नावसोर्द्धाराःसप्तधाराघृतेनतु ॥ कारयेत्पञ्चधारावाना
तिन्यूनाःकदाचन ॥ १ ॥ अथायुष्यजयःआयुष्यंवर्च्चस्यꣳ रायस्योषमौद्
भिदम् ॥ इदꣳ हिरण्यम्वर्च्चस्वज्जैत्रायाविशतादुमाम् ॥ १ ॥ नतद्रक्षाꣳसि
नपिशाचास्तरन्तिदेवानामोजःप्रथमजꣳ ह्येतत् ॥ योबिभर्तिदाक्षायणꣳ
हिरण्यꣳ सदेवेषुकृणुतेदीर्घमायुःसमनुष्येषुकृणुतेदीर्घमायुः ॥ २ ॥ यदाव



Indira Gandhi National Centre for the Arts

पञ्चधारायक्षेश्रद्धासरस्वत्यौविहायान्यासाम्पूजनमितिज्ञेयम् ॥ ३ ॥

धन्दाक्षायणांहिरण्यर्ठ शतानिकायसुमनस्यमानाः तन्मऽअवाध्नामिशत
शारदायायुष्माँजरदष्टिर्यथासम् ॥ ३ ॥ आयुष्याणिचशान्त्यर्थंजप्त्वातत्र
समाहितःषड्भ्यःपितृभ्यस्तदनुभक्त्याश्राद्धमपक्रमात् ॥ अथनान्दीश्राद्ध
म् ॥ तत्रकालः ॥ मातृश्राद्धन्तुपूर्वाण्हेमध्यान्हेपैतृकन्तथा ॥ ततोमा
तामहानाञ्चवृद्धौश्राद्धत्रयंस्मृतमितिहेमद्र्यादिनिबन्धेउक्तम् ॥ तथा ॥
अलाभेभिन्नकालानांनान्दीश्राद्धत्रयंबुधः ॥ पूर्वेद्युर्वैप्रकुर्वीतपूर्वाण्हेमा
तृपूर्वकमितिवृद्धमनुवचनम् ॥ साँकल्पिकेचसमंत्रकावाहनार्घाग्नौकरण
पिंडदानविकिराक्षय्ययस्वधावाचनप्रश्नेत्येतत्सप्तकंवर्ज्यम् ॥ सांकल्पे ॥
कृतेनान्दीमुखेमध्येनकुर्यात्द्वितयम्पुनः ॥ राजा ॥ ॥

IGNCA RAR
ACC. No. R-207
Indira Gandhi National Centre for the Arts

अविघ्नपूजनादारम्यायुष्यजपान्तंसर्वकर्म्मविवाहेउपनयनेचूडाकर्णकेशान्तेसीमन्तोन्नयनेचकर्तव्यमन्यत्रतुगौर्यादि
षोडशमातृणांपूजनंवसोर्द्धारा.पूजनश्चकृत्वाऽऽभ्युदयिकश्राद्धंकुर्य्यादितिबोधव्यम् ॥ ४ ॥





भिषेकेकुर्वीततथैवपुत्रजन्मनीति ॥ अथसांकल्पिकाभ्युदयिकश्राद्धप्रयोग: ॥ श्राद्धदेशमागत्याचम्यप्रांगुखउदंमुखोवोपविशेत् ॥ सव्येनसर्वकर्म कर्तव्यम् ॥ ऋजवएवकुशा:तिलकार्येयवादातव्या: ॥ ॐअपवित्र:पवित्रोवासर्वावस्थाङ्गतोपिवा ॥ य:स्मरेत्पुंडरीकाक्षंसवाह्याभ्यन्तर:शुचि:ॐपुण्डरीकाक्ष:पुनातु ॥ इतिश्राद्धद्रव्याणिसिंचेतकुशोदकेन ॥ तत:कुशयवजलान्यादायॐअद्यामुकगोत्राणां मातृपितामहीप्रपितामहीनाममुकामुकदेवीनान्नान्दीमुखीनांतथामुकगोत्राणां पितृपितामहप्रपितामहानाममुका



Indira Gandhi National Centre for the Arts

मुकशर्माणां नान्दीमुखानान्तथाऽमुकगोत्राणाम्मातामहप्रमातामहवृद्ध
प्रमातामहानाममुकामुकशर्माणां सपत्नीकानान्नान्दीमुखानाममुकगोत्र
स्यामुकस्यामुककर्मनिमित्तकंसांकल्पिकेनविधिनाभ्युदयिकश्राद्धमहंकरि
करिष्ये। इतिसंकल्पंकृत्वा॥ ततोगायंत्रींत्रिर्जपेत्॥ सत्यवसुसंज्ञकाविश्वे
देवानान्दीमुखा इदम्वःपाद्यंपादावनेजनपादप्रक्षालनंवृद्धिःगोत्राःमतृपि
तामहीप्रपितामह्योनान्दीमुखाइदम्वःपाद्यं पादावनेजनंपादप्रक्षालनम्वृ
द्धिःगोत्रा. पितृपितामह प्रपितामहानान्दीमुखाइदम्वः पाद्यंपादा
वनेजनम्पादप्रक्षालनम्वृद्धिः द्वितीयगोत्रामातामहप्रमातामहवृद्धप्रमाता
महाः सपत्नीकानान्दीमुखाइदम्वः पाद्याम्पादावनेजनम्पादप्रक्षालनम्वृ

Indira Gandhi National Centre for the Arts

पं० द्धिः ॥ सत्यवसुसंज्ञकाविश्वेदेवानान्दीमुखाइदमासनम्वोनमः ॥ नांदीश्रा प०
द्धेक्षणःक्रीयतांयथाप्राप्नुवन्तोभवन्तस्तथाप्राप्नुवामः॥ गोत्राःमातृपिता
॥२७॥ महीप्रपितामत्द्यःनान्दीमुख्य इदमासनम्वोनमः॥ नान्दीश्राद्धेक्षणःक्रीय
तांयथाप्राप्नुवन्त्योभवन्त्यस्तथाप्राप्नुवामः ॥ गोत्राः पितृपितामहप्र
पितामहाप्रपितामहानान्दीमुखाइदमासनम्वोनमः ॥ नान्दीश्राद्धेक्षणाः
क्रीयतांयथाप्राप्नुवन्तोभवन्तस्तथाप्राप्नुवामः ॥ ३ ॥ द्वितीयगोत्रामाता
महप्रमातामहवृद्धप्रमातामहाःसपत्नीकानान्दीमुखाइदमासनम्वोनमः ॥ ॥२७॥
नान्दीश्राद्धेक्षणःक्रीयतांयथाप्राप्नुवन्तोभवन्तस्तथाप्राप्नुवामः ॥ ४ ॥
अत्रापान्तु ॥ गंधाः पातु ॥ अक्षताःपान्तु ॥ पुष्पाणिपान्तु ॥ सत्यवसुसंज्ञ

Indira Gandhi National Centre for the Arts

काविश्वेदेवानान्दीमुखाइदम्वोगन्धाद्यर्च्चनंस्वाहासम्पद्यन्ताम् ॥ वृद्धिः॥१॥
गोत्राः मातृपितामहीप्रपितामह्योनान्दीमुख्यइदम्वोगन्धाद्यर्च्चनंस्वाहा
सम्पद्यन्ताम्वृद्धिः ॥ २ ॥ गोत्राःपितृपितामहप्रपितामहानान्दीमुखाइदंवो
गन्धाद्यर्च्चनंस्वाहासम्पद्यन्ताम्वृद्धिः ॥३॥ द्वितीयगोत्रामातामहप्रमाताम
हवृद्धप्रमातामहाः सपत्नीकानान्दीमुखाइदंवोगंधाद्यर्च्चनंस्वाहासम्पद्यन्ता
म्वृद्धिः ॥ ४ ॥ सत्यवसुसंज्ञकाविश्वेदेवानान्दीमुखाएतद्वोयुग्मब्राह्मणभोज
नपर्याप्तान्ननिष्क्रयीभूतन्द्रव्यममृतरूपेणस्वाहा ॥ सम्पद्यन्ताम्वृद्धिः ॥ १ ॥
गोत्रामातृपितामहीप्रपितामह्योनान्दीमुख्य एतद्वोयुग्मब्राह्मणाभोजनप
र्याप्तान्ननिष्क्रयीभूतंद्रव्यममृतरूपेणस्वाहासम्पद्यन्ताम्वृद्धिः ॥२॥ गोत्राः

Indira Gandhi National Centre for the Arts

पं० पितृपितामहप्रपितामहानान्दीमुखाएतद्वो युग्मब्राह्मणाभोजनपर्याप्तान्न पं०
॥२८॥ निष्क्रयीभूतन्द्रव्यममृतरूपेणस्वाहासम्पद्यन्ताम्वृद्धिः ॥ ३ ॥ द्वितीयगोत्रा
मातामहप्रमातामहवृद्धप्रमाताभहास्सपत्नीका नान्दीमुखाएतद्वोयुग्मब्रा
ह्मणभोजनपर्याप्तान्ननिष्क्रयीभूतन्द्रव्यममृतरूपेण स्वाहासम्पद्यन्ताम्वृ
द्धिः ॥ ४ ॥ क्षारयवजलानिदद्यात ॥ सत्यवसुसंज्ञकाविश्वेदेवानांदीमुखाः
प्रीयन्ताम् ॥ १ ॥ गोत्रामातृपितामहीप्रपितामत्द्योनान्दीमुख्य'प्री· ॥२ ॥
गोत्रा·पित्टपितामहप्रापितामहानान्दीमुखाः प्री. ॥ ३ ॥ द्वितीयगोत्रामा
महप्रमातामहवृद्धप्रमातामहाःसपत्नीकानान्दीमुखा·प्री ॥ ४ ॥ ततॐगो ॥२८॥
त्रन्नोवर्द्धंतान्दातारोनोऽभिवर्द्धन्ताम्वेदःसंततिरेवच ॥ श्रद्धाचनोमाव्यगम

Indira Gandhi National Centre for the Arts

द्दद्देयश्चनोस्त्विति ॥ अन्नञ्चनोवहुभवेदतिर्थीश्चलभेमहियाचितारश्चनः
सन्तुमाचयाचिष्मकश्चनएताःसत्या आशिषःसंतु ॥ इत्याशीःप्रार्थयेत् ॥
सत्यवसुसंज्ञकानांविश्वेषान्देवानान्नान्दीमुखानां कृतैतदाभ्युदयिकश्राद्ध
प्रतिष्ठार्थमिदन्द्राक्षामलक यवमूलनिष्क्रयीभूतन्द्रव्यंयथानामगोत्रायब्रा
ह्मणायदक्षिणां दातुमहमुत्सृजे गोत्राणाम्मातृपितामहीप्रपितामहीनांना
न्दीमुखीनां कृतैतदाभ्युदयिकश्राद्धप्रतिष्टार्थमिदन्द्राक्षामलकयवमूलनि
ष्क्रयीभूतन्द्रव्यंयथा. २ गोत्राणां पितृपितामह प्रपितामहानां ना
न्दीमुखानांकृतैतदाभ्युदयिकश्राद्धप्रतिष्टार्थमिन्द्राक्षामलकयवमूलनिष्क्र
यीभतन्द्रव्यंयथाः ३ द्वितीयगोत्राणाम्मातामह प्रमातामह वृद्धप्रमा

पं० तामहानान्नान्दीमुखानां सपत्नीकानांकृतैतदाभ्युदायिकश्राद्धप्रातिष्ठार्थामि पं०
दन्द्राक्षामलकयवमूलनिष्क्रयीभूतन्द्रव्यं यथा ४ ॐउपास्मैगायतांन
॥२३॥ रःपवमानायेन्दवे ॥ अभिदेवाँइयक्षते ॥ १ ॥ इडामग्नेपुरूदठं सठं सनि
ङ्गोः ॥ शश्वत्तमठं हवमानायसाध ॥ स्यान्नः सूनुस्तनयोविजावाग्नेसातेसु
मतिर्भूत्वस्मे ॥ २ ॥ वाजेवाजेवतवाजिनोनोधनेषुविप्राऽअमृताऽऋतज्ञाः
॥ अस्यमध्वःपिवतमादयध्वन्तृप्तायातपथिभिर्देवयानैः॥इतिपितृविसर्ज्जन
म ॥ ॐविश्वेदेवाःप्रीयन्ताम ॥ इतिदेवविसर्ज्जनम ॥ अस्मिन्नान्दीश्राद्धेन्यू ॥ २९ ॥
नातिरिक्तोयोविधिःसउपविष्टब्राह्मणानाम्वचनातपरिपूर्णोऽस्तु अस्तुपरि
पूर्णः ॥ इतिनान्दीश्राद्धम ॥ शुभार्थीप्रथमान्तेनवद्धौसंकल्पमाचरेत ॥ नष

Indira Gandhi National Centre for the Arts

ष्टयायदिवाकुर्यातमहान्दोषोभिजायते ॥ १ ॥ इतिनमन्तव्यम् ॥ शाखा
न्तरत्वादतएवरुद्रधरेणापिप्रतिज्ञासंकल्पोदक्षिणासंकल्पश्चषष्टयोक्तः ॥
अनस्मताद्दिह्वशब्दानामरूपाणामगोत्रिणाम् ॥ अन्नाम्नामातिलाद्यैश्चनांदी
श्राद्धश्वसव्यवत्तअथाचार्यादिवरणम् ॥ आचार्यस्तुयथास्वर्गेशक्रादीना
म्बृहस्पतिःतथात्वंममयज्ञेस्मिन्नाचार्योभवसुव्रत ॥ १ ॥ ॐबृहस्पते
ऽअतियदर्यो अर्हाद्युमाद्विभाति क्रतुमज्जनेषु यद्दीदयच्छवसऽऋतप्र
जाततदस्मासुद्रविणन्धेहिचित्रम् ॥ १ ॥ अमुकगोत्रोत्पन्नोऽमुकप्रव
रान्वितोऽमुकशर्मा यजमानोहममुकगोत्रोत्पन्नममुकप्रवरान्वितंशुक्ल

आचार्यस्यदक्षिणजानुंस्पृष्ट्वापठेद्देवंसर्वत्रब्रह्मादिवरणेष्वपिवोढव्यम् ॥ २ ॥

Indira Gandhi National Centre for the Arts

पं० यजुर्वेदान्तर्गत ॥ माध्यन्दिनीयशाखाध्यायिनममुकशर्माणम्ब्राह्मणम प०
स्मिन्ममामुककर्मण्याचार्यत्वेन त्वामहम्वृणे वृतोस्मि ॥ गंधादिभिः
॥२०॥ संपूज्य ॥ यथाचतुर्मुखोब्रह्मासर्वलोकपितामहः तथा त्वंममयज्ञेस्मिन्ब्र
ह्माभवद्विजोत्तम १ ब्रह्मयज्ञानम्प्रथमम्पुरस्ताद्विशीमतः सुरुचोवेनऽआवः
सबुध्न्याऽउपमाऽअस्यविष्ठा सतश्चयोनिमसतश्चविवः १ अस्मिन्नमुक
कर्मणिब्रह्मत्वेनत्वामहंवृणे ॥ वृतोस्मि ॥ वांछितार्थफलावाप्त्यैपूजितोसि
सुरासुरैः ॥ निर्विघ्नंक्रतुसंसिध्यैत्वामहंगणयंवृणे १ ॐगणानांत्वा ॥ १ ॥
अस्मिन्नमुककर्मणिगाणपत्यत्वेनत्वामहंवृणे ॥ वृतोस्मि ॥ कर्मणामुपदेष्टा ॥२०॥
रंसर्वकर्मविदुत्तमम् ॥ कर्मिणंवदतत्वज्ञंसदस्यन्त्वामहम्वृणे ॥ १ ॥ ॐसद

Indira Gandhi National
Centre for the Arts

सस्पतिमद्भुतंप्रियमिन्द्रस्यकाम्यम् ॥ सनिम्मेधामयासिषःस्वाहा ॥ १ ॥
अस्मिन्नमुककर्मणिसदस्पत्वेनत्वामहम्वृणे ॥ वृतोस्मि ॥ ततश्चतुरोष्टौ
वाऋत्विजोवृणुयात् यज्ञादिकर्मकार्येषुऋत्विग्शक्रमखेयथा ॥ तथायज्ञा
दिकार्येस्मिन्नऋत्विग्त्वंमेमखेभव ॥ १ ॥ अस्मिन्नः ऋत्विकत्वेनत्वामहं
वृणे ॥ वृतोस्मि ॥ ततः सूक्तजपार्थे ऋग्वेदादीन्वृणुयात ॥ ऋग्वेदः पद्मप
त्राक्षोगायत्रः सोमदैवतः ॥ अत्रिगोत्रस्तुविप्रेन्द्रऋत्विग्त्वंमेमखेभव ॥१॥
ॐअग्निमीलेपुरोहितं यज्ञस्यदेवमृत्विजम् ॥ होतारंरत्नधातमम् ॥ १ ॥ अ
स्मिन्नमुककर्मणिऋत्विकत्वेनत्वामहंवृणे ॥ वृतोस्मि॥कातराक्षोयजुर्वेदस्त्रै
६ ष्टुभोब्रह्मदैवतः ॥ भारद्वाजस्तु विप्रेंद्रऋत्विग्त्वमेमखेभव ॥ १ ॥ ॐइषे

पं० त्वोर्ज्जेत्वाव्वायवस्थदेवोवः सविताप्रार्प्पयतुश्रेष्ठतमायकर्म्मणऽआप्याय प०
ध्वमघ्न्याऽइन्द्रायभागम्प्रजावतीरनमीवा अयक्ष्मामावस्तेनऽईशतमाय
॥३१॥ सर्ठ॰ सोध्रुवाऽअस्मिनोयतौस्यातवह्वीर्यजमानस्यपशून्पाहि ॥ १ ॥ अ
स्मिन्नमु॰ वृणे ॥ वृतोस्मि ॥ सामवेदस्तुपिंगाक्षोजागतःशक्रदैवतः ।
काश्यपेयस्तुविप्रेन्द्रऋत्विक्त्वंमेमखेभव ॥ १ ॥ ॐअग्नआयाहिवीतये
गृणानोहव्यदातये । निहोतासत्सिवर्हिषि ॥ १ ॥ अस्मिन्नमुक॰ ॥ वृहन्ने
त्रोथर्ववेदोनुष्टुभोरुद्रदैवतः ॥ वैखानसकुलोत्पन्नःऋत्विग्त्वं॰ ॥ १ ॥ ॐश ॥३१॥
न्नोदेवीरभिष्टयऽआपोभवन्तुपीतये । शंय्योरभिस्रवन्तुनः ॥१॥अस्मिन्नमु
ककंव्वृणेवृतोस्मि॥भगवन्मूर्त्तिसर्वज्ञसर्वधर्मभृताम्बर॥वितते मम यज्ञेस्मिन्

Indira Gandhi National Centre for the Arts

जपार्थेत्वामहंवृणे ॥ १ ॥ अस्मिन्नमुककर्मणिरुद्रजपार्थेत्वामहं० वृतोस्मि ॥
ऋत्विजोगंधादिभिःसंपूजयेत् ॥ यजमानर्त्विजःपरस्परंयज्ञकंकणंबध्नीयुः॥
ॐव्रतेनदीक्षामाप्नोतिदीक्षयाप्नोतिदक्षिणाम दक्षिणाश्रद्धामाप्नोतिश्रद्धयास
त्यमाप्यते ॥एतावद्रूपंय्यज्ञस्ययद्देवैर्ब्रह्मणाकृतम्॥तदेतत्सर्वमाप्नोतियज्ञेसौ
त्रायणीसुते॥१।अथप्रार्थनाब्राह्मणाःसन्तुमेशस्ताःपापात्पान्तुसमाहिताः।
देवानांचैवदातारःपातारःसर्वदेहिनाम्॥१जपयज्ञैस्तथाहोमैर्दानैश्चाविविधैः
पुनः ॥ देवानाञ्चऋषीणाञ्चतृप्त्यर्थंयाजकाःकृताः॥ २॥येषान्देहेस्थितावेदा
पावयंतिजगत्त्रयम्॥रक्षन्तुसततंतेमांजपयज्ञैर्व्यवस्थिताः॥३॥ब्राह्मणाजंगम
न्तीर्थंत्रिषुलोकेषुविश्रुतम् ॥ तेषांवाक्योदकेनैवशुध्यन्तिमलिनाजनाः॥४॥

Indira Gandhi National Centre for the Arts

पावना:सर्ववर्णानांब्राह्मणाब्रह्मरूपिण: ॥ सर्वकर्मरतानित्यंवेदशास्त्रार्थको
विदा: ॥५॥ श्रोत्रियाःसत्यवाचश्चग्रहध्यानरता:सदायद्वाक्यामृतसंसिक्ता
ऋद्धिंयान्तिनरद्रुमा: ॥६॥ अंगीकुर्वन्तुकर्मैतत्कल्पद्रुमसमाशिष: ॥ य
थोक्तनियमैर्युक्तामंत्रार्थैस्थिरवुद्धय: ॥७॥ यत्कृपालोचनात्सर्वाऋद्धयोवृ
द्धिमाप्नुयु: ॥ अस्मिन्होमेमयापूज्या:सन्तुमेनियमान्विता: ॥८॥ अ
क्रोधना:शौचपरा:सततंब्रह्मचारिण: ग्रहध्यानरतानित्यंप्रसन्नमनस:सदा
॥९॥ अदुष्टभाषणा:सन्तु मासन्तुपरनिंदका:॥ममापिनियमात्येतेभवन्तु
भवतामपि॥१०॥इतिसम्प्रार्थ्यतान्ब्रूयाद्यथावक्रियताविधि: ॥ऋत्विजश्चय
थापूर्वंशक्रादीनाम्मखेभवन् ॥ ११ ॥ यूयन्तथामेभवतऋत्विजोद्विजसत्त



Indira Gandhi National Centre for the Arts

मा: ॥ अस्ययागस्यनिष्पत्तौभवन्तोभ्यर्चितामया ॥ १२ ॥ सुप्रसन्नैःप्रकर्त
व्यंशान्तिकर्म्मविधिपूर्वकम् ॥ इत्याचार्य्यादिवरणम् ॥ अथदिग्रक्षणम् ॥ तत
आचम्यप्राणानायम्यदेशकालौस्मृत्वाअस्मिन्नमुककर्मणि यजमानेनवृ
तोहमाचार्यकर्मकरिष्ये ॥ तदङ्गशरीरशुध्यर्थंपुरुषसूक्तजपंकरिष्येइतिपुरुष
सूक्तंषोडशर्चंजपेत् ॥ ततआचार्योवामहस्तेगौरसर्षपान्लाजमिश्रान्गृही
त्वादिग्रक्षणंकुर्यात ॥ तत्रमंत्राः ॥ रक्षोहणम्वलगहनम्वैष्णवीमिदमहंतम्व
लगमुत्किरामियम्मे निष्टयोयममात्योनिचखानेदमहन्तम्वलगमुत्किरा
मियम्मेसमानोयमसमानोनिचखानेदमहन्तम्वलगमुत्किरामियम्मे स
वन्धुर्य्यमसवन्धुर्निचखानेदमहन्तम्वलगमुत्किरामियम्मे सजातोयमस

Indira Gandhi National Centre for the Arts

पं० जातोनिचखानोत्कृत्याङ्गिरामि ॥ १ ॥ रक्षोहणोवोव्वलगहनःप्रोक्षामिव्वै प०
ष्णवान्त्रक्षोहणोवोव्वलगहनोवनयामि वैष्णवान्त्रक्षोहणोवोव्वलगहनोन
॥२३॥ स्तृणामिवैष्णवान्त्रक्षोहणौवाँव्वलगहनाऽउपदधामि व्वैष्णवीरक्षोहणौ
वाँव्वलगहनौपर्यूहामिव्वैष्णवीव्वैष्णवमसिव्वैष्णवास्थ ॥ २ ॥ रक्षसाम्भा
गोसिनिरस्तꣳ रक्षऽइदमहꣳ रक्षोभितिष्ठामीदमहꣳ रक्षोवबाधऽइदम
हꣳ रक्षोधमन्तमोनयामि ॥ घृतेनद्यावापृथिवीप्रोर्णुवाथाँव्वायोव्वेस्तो
कानामग्निराज्यस्यव्वेतुस्वाहास्वाहाकृतेऽउर्ध्वनभसंमारुतङ्गच्छतम् ॥ ३ ॥ ॥२३॥
रक्षोहाव्विश्वचर्षणिरभियोनिमयोहतेद्रोणेसधस्थमासदत् ॥ ४ ॥ अपस
र्पन्तुतेभूतायेभूताभूमिसंस्थिताः ॥ येभूताविघ्नकर्तारस्तेनश्यन्तुशिवाज्ञ

Indira Gandhi National Centre for the Arts

या ॥ १ ॥ अपक्रामन्तुभूतानिपिशाचाःसर्वतोदिशम् ॥ सर्वेषामविरोधेन
शान्तिकर्मसमारभे ॥ २ ॥ यदत्रसंस्थितंभूतंस्थानमाश्रित्यसर्वतः ॥ स्था
नंत्यक्त्वातुतत्सर्वंयत्रस्थंतत्रगच्छतु ॥ भूतप्रेतपिशाचाद्याअपक्रामन्तुरा
क्षसाः ॥ स्थानादस्माद्व्रजत्त्वन्यत्स्वीकरोमिभुवन्त्विमाम् ॥ ४ ॥ भूतानि
राक्षसावापियत्रतिष्ठन्तिकेचन ॥ तेसर्वेप्ययगच्छंतुशान्तिकन्तुकरोम्य
हम् ॥५॥ इतिमंत्रैरीशानादिसर्वदिक्षुविकिरेत ॥ उदकोस्पर्शः॥पञ्चाङ्गपद्धति
र्ह्येषासर्वकर्म्मोपकारिका॥शोधिताऽतिप्रयत्नेनशालग्रामेणधीमता ॥ १ ॥

॥ इतिपञ्चाङ्गपद्धतिः समाप्ता ॥

Indira Gandhi National Centre for the Arts

# जाहिरात.

## वैदिकग्रन्थाः।

रुद्रीशुक्लयजुर्वेदीय मोटेअक्षरोंमे स्वरसहित ।)
नित्यकर्म प्रयोगमाला ... ... ... ।)॥
नित्यकर्मपद्धति ... ... ... -)॥
पुरुषसूक्त श्रीसूक्त मोटे अक्षरों सहित ... -)॥

## वेदान्तग्रन्थाः संस्कृत तथा भाषाटीका.

श्रीमद्भगवद्गीता भाषाटी०दोहासहितग्ले.१।)रफ १)
श्रीरामगीता मूल ... ... ... =)
श्रीमद्भगवद्गीता पंचरत्न बडे अक्षरकागुटका
रेशमी पाठकरने योग्य है ग्लेज ... १)
गीता पंचरत्न अक्षर बडा १६ पेजी रफ ... ॥।)
गीता श्रीधरीटीका सहित ... ... १)
गीतामूल बडे अक्षरकी गुटकारे०ग्ले.।॥) रफ॥=)
गीता गुटका ३२ पेजी भाषाटीका दोहा ... ॥=)
गीता पंचरत्न ६४ पेजी पाकिट बुक ... ।=
गीता गुटका १२८पेजी पाकिट बुक ... ।)॥
पाण्डवगीता भाषाटीका सह ... ... =)
पाण्डवगीता मूल बडा अक्षर ... ... )॥
आत्मबोध भाषाटीका ... ... ... ।)
तत्वबोध भाषाटीका ... ... ... =)
जगद्गुरु श्रीशंकराचार्यजी महाराजकाजी०च०।॥)

## वेदान्तग्रन्थ भाषा।

योगवासिष्ठ-मुमुक्षु वैराग्यप्रकरण संस्कृतश्लोक
और भाषाटीका ... ... ... २)

Indira Gandhi National Centre for the Arts

| | |
|---|---|
| धनिष्ठा पंचकशान्ति भाषा टीका ... | ॥ |
| नवग्रहविधान पद्धति ... ... ... | । |
| शूद्रबिवाहपद्धति मूल ... ... ... | ।) |
| पार्बणश्राद्ध पद्धति भाषाटीका ... ... | ।) |
| एकोद्दिष्टश्राद्धपद्धति भाषाटीका ... ... | ＝) |
| विज्ञप्तिशतकम् अर्थात् बिवाह विनय भा.टी. | ।॥) |
| सन्ध्यायजुर्वेदी मूल ... ... ... | –)॥ |
| त्रिकाल सन्ध्या भाषाटीका ... ... | =) |
| क्षत्रियसन्ध्या ... ... ... | –)॥ |
| वैश्यसंध्या ... ... ... ... | –) |
| मूलशांति भाषा टीका ... ... ... | =) |
| नारायणबलि भा. टी. ... ... ... | ॥।) |

| | |
|---|---|
| सर्वपूजा ... ... ... ... | ।) |
| कात्यायनीशांति भा० टी० ... ... | ।=) |
| दवऋीषर्तपण नित्यतर्पण ... ... | –) |
| महालक्ष्मीपूजा भाषाटीका सहित ... | ॥) |
| महालक्ष्मीव्रत कथा भाषाटीका ... | =) |

## योगमार्गग्रन्थाः ।

| | |
|---|---|
| शिवस्वरोदय भाषाटीका सहित ... ... | =) |
| स्वरोदयसार चरणदासकृत ... ... | =) |
| योगांगस्वरोदय सरलहिन्दीभाषा इसमेंयोग सिद्धांत. क्रिया वगैरः अति उत्तम हैं | =) |

## पुराण इतिहास ग्रन्थाः ।

| | |
|---|---|
| अध्यात्मरामायण–मूलगुटका पाठ करनेयोग्यहै | ॥।) |

Indira Gandhi National Centre for the Arts

योगवासिष्ठभाषा–दोप्रकरण वैराग्य, मुमुक्षु ।=)
योगवासिष्ठसंस्कृत और भा०टी० स० सम्पूर्ण १६)
अध्यात्मप्रकाश भाषा ( वेदांत )... ... ≡)
सुन्दरबिलास सर्वोत्तम मूल्य सवैया ... ।)॥
ज्ञानसमुद्र सुन्दरदास कृत... ... ... ≡)
तत्वविज्ञान भाषाटीका ... ... ... =)

## धर्मशास्त्रग्रन्थाः ।

मनुस्मृति सान्वय भा०टी० ग्लेज सर्वोत्तम बडा ३)
,, ,, तथा रफ ,,... २॥)
याज्ञवल्क्यस्मृति मिताक्षरासंस्कृतटीका ... ३)
निर्णयसिन्धु भाषाटीका सहित–मूल्य ग्लेज ७)
,, ,, तथारफका ,,... ६)
श्रीमधुसूदनसंहिता मूलमात्रहै ... ... २)
क्षौरनिर्णय मूल ... ... ... –)॥
तिथिनिर्णय मूल ... ,, ... –)॥
अशौचनिर्णय मूल ... ... ... –
दानचंद्रिका भाषाटीका ... ... ॥)
शांतिसार ( सब प्रकारकी शांति है ) ... १।)
गंगास्थितिनिर्णय भाषाटीका ... ... =)
श्राद्धप्रयोगावली सब श्राद्धोंके प्रयोग हैं ... १)

सर्व पुस्तकैं मिलनेका पता–

**पंडित श्रीधर शिवलालजी**

ज्ञानसागरप्रेस पोष्ट माहिम––बम्बई

Indira Gandhi National Centre for the Arts

॥ इति श्रीपञ्चाङ्गपद्धति समाप्ता ॥

1/97

IGNCA
ACC. No. R-207

Indira Gandhi National Centre for the Arts